॥ ओ३म् ॥

# ॥ वेदनिर्णयः ॥

अर्थाद्

श्री १०८ महाराजकरोलीश श्री १०८ महाराजशाहपुराधीशयोराज्ञया तत्तद्राजपण्डितयोर्लेखप्रतिलेखप्रभृतः ।

सोऽयम्

उक्तश्रीराजाधिराजशाहपुराधीश श्री १०८ नाहरसिंहवर्म्मदेवनिदेशेन राजगुरुषट्शास्त्रियमुनादत्तशर्म्म-द्वारा

काशिक हितचिन्तक यन्त्रालये मुद्रितः ॥

स्वीकृत्य पुस्तकममुं सुधियः समीक्ष्य
लोके प्रकाशयत सारमितो विचिन्त्य ॥
सद्धर्म्मनिर्णयमना नितरां विनीतः
संप्रार्थयेऽहमिति नाहरसिंहवर्म्मा ॥ १ ॥

सं० १९५६ नाग ५

प्रथमावृत्तौ पुस्तकानि १०००

ओ३म
गुरु विरजानन्द दण्डी
संदर्भ पुस्तकालय
दयानंद महिला महाविद्यालय
कुरुक्षेत्र
3295
वर्गीकरण नम्बर ..............................
पु. परिग्रहण क्रमांक ..........................

गुरु विरजानन्द दण्डी
सन्दर्भ पु
परिग्रहण क्रमांक 3295
दयानन्द महिला महाविद्यालय, कुरुक्षेत्र
दिनांक 12-10-65

## ॥ ओ३म् ॥

पुरुषाः प्रतिपद्यन्ते देवत्वं ।दनुग्रहात् ।
काशीकुम्भजवीथीस्थ इकुलसम्भवान् ॥ १ ॥
श्री१०८मद्भावानन्दतीर्थ--श्री१०८पादपरिचारकान् ।
विद्वच्छ्री ८ रामनाथाख्याँ--स्तान् वन्देऽहं गुरून् सदा ॥ २ ॥

## ॥ वेदनिर्णयस्योपक्रमादिः ॥

इह खलु तत्तदधिकारिकमनीया धर्म्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थास्तत्तत्कारणावगममन्तरा न सम्भवन्तीत्यपरोक्षं प्रेक्षावताम्, तत्तत्कारणावगमश्च गुरुपरंपराप्राप्तोऽपि न ग्रन्थविशेषमनवलम्ब्य स्थैर्यमालम्बत इत्यप्यापामरप्रसिद्धम्, ग्रन्थविशेषाश्च न पूर्वपूर्वप्रामाणिकग्रन्थाननवलम्ब्य प्रवृत्ता भवन्ति प्रेक्षावतां श्रद्धेयाः, तेषां चोत्तरोत्तरग्रन्थमूलभूतपूर्वपूर्वग्रन्थानामविश्रान्तत्वे दुर्निवारैव तत्तत्कारणगवेषणेति पर्यालोचयद्भिः सूक्ष्मप्रेक्षाशालिभिः परमपवित्रार्यावर्त्तदेशीयैर्वेदनामक एव ग्रन्थविशेषः सकलपुरुषार्थकारणकलाकलापप्रकाशनसमर्थोऽपौरुषेयतया सर्वप्रामाणिकग्रन्थपरममूलतया च सुचिरात् सममानीति न्यायोपेतो घण्टापथः, स चायं निखिलज्ञानसाधनभूतोऽपि वेदोऽज्ञानबहुलकालिकालवशात् स्वस्वरूपनिर्णयेऽप्यशक्त इव क्षीणप्रज्ञ इवानार्य्यदेशीयैरितस्ततः स्वस्वप्रयोजनवशात् समाकृष्यमाणो न प्रभवति सुधियामपि पुरुषार्थं सम्पादयितुमिति साम्प्रतं तत्स्वरूपनिर्णय एव सकलपुरुषार्थसाधनतया पर्यवसितः समीहित ऊहापोहशालिनामित्यादिविवेचनाचतुरौ प्रजापालनतत्परौ सदातनार्यधर्मव्यवस्थापकौ श्री१०८मन्महामहिममहाराजकरोलीश श्रीभँवरपालदेववर्म्म श्री१०८मन्महामहिममहाराजशाहपुराधीशश्रीनाहरसिंहदेववर्म्माणौ सुचिरात् प्रस्तुतवेदस्वरूपनिर्णयं सकलार्य-

जनकमनीयं कामयमानौ गतवत्सरे परस्परं संमतिं कृत्वा पत्रप्रतिपत्रलेखादिद्वारा प्रस्तुतविषयनिर्णयाय स्वस्वराजपण्डितं समादिक्षताम्, तयोश्च स्वस्वान्नदातृसमाज्ञापितयोर्विदुषोः पत्रप्रतिपत्रलेखादिद्वारा पूर्णेन संवत्सरेण यो निर्णयः समपद्यत सोऽयमखिलविद्वद्बुद्धिमत्समीक्षणायोक्तशाहपुराधीशानिदेशेन तत्पत्रप्रतिपत्राण्येव मुद्रयित्व  दनिर्णय ) नामकपुस्तकरूपेण प्रकाश्यते ॥

तत्र यद्यपि करोलीपत्रेषु पुरःप्रदर्शयिष्यमाणप्रभृतीनि पदादीन्येव विदुषां सन्तोषदायीनि न सन्तीति तेषां बहुमूल्यकालव्ययोऽत्र ग्रन्थावलोकनविषये असम्भावितप्राय एवास्ति, तथापि सारासारविवेकनिपुणमतितया सुप्रसिद्धानां तेषां दृष्टिपथप्रवेशमन्तराऽस्य ग्रन्थस्य कार्यक्षमताऽनर्हत्वमेतद्ग्रन्थसाध्यस्य कार्यस्य वेदस्वरूपनिर्णयस्य च सकलार्यजनावश्यचिकीर्षिततां चावधारयन्तो धीरा एतस्मादसारसंसृष्टादपि सारं यशस्सिता हंसा इव नीरसंसृष्टं क्षीरमादाय स्वोपयोगितया परोपयोगितया वा चेत्प्रकाशयेयुस्तर्हि तेषां सकलार्यजनोपकारितां सर्वान्तर्यामिपरमेश्वरप्रसादानुविधायिनीं शिरसा श्लाघमानः सम्भावये सकलनिरुक्तोद्योगसाफल्यमिति प्रार्थयते ।

| | |
|---|---|
| सं० १९५६<br>आषाढी १५ | शाहपुराधीशराजाधिराज-<br>श्री १०८ नाहरसिंहदेववर्म्मगुरुः<br>पट्टशास्त्री यमुनादत्तशर्म्मा ॥ |

## ॥ करोलीपत्त्रेषु असन्तोषकारीणि पदासभ्यलेखनादीनि ॥

| असाधुपदानि | पृष्ठे | पङ्क्तौ | असाधुपदानि | पृष्ठे | पङ्क्तौ |
|---|---|---|---|---|---|
| परीता ... ... ... ... | १ | १२ | अग्रासादीनि ... ... | २८ | २० |
| परीता ... ... ... ... | १ | १४ | वुक्कणमेव ... ... ... | २८ | २२ |
| जमुना ... ... ... ... | ६ | १६ | छति ... ... ... ... | ३१ | १७ |
| अन्तस्करण ... ... | ६ | २५ | उपासीत् ... ... ... | ३७ | ८ |
| शतपथ ... ... ... | ७ | ७ | सौकार्य्याय ... ... | ३७ | २६ |
| कुर्वन् ... ... ... ... | ७ | ८ | सादिमत्व ... ... ... | ३७ | ३० |
| जमुना ... ... ... ... | १७ | ५ | शतपथ ... ... ... | ३८ | ४ |
| शतपथ ... ... ... ... | १८ | ८ | काचिच्छति ... ... | ३८ | ४ |
| घुक्कणेन ... ... ... ... | १९ | २ | विद्यन्ते ... ... ... | ३८ | २७ |
| साम्यत्वं ... ... ... | २० | १३ | उपासीत् ... ... ... | ३९ | ७ |
| साम्यत्वं ... ... ... | २० | १७ | लिपितं ... ... ... | ४० | ६ |
| शतपथ ... ... ... | २१ | ११ | बुक्कणं ... ... ... | ४० | १० |
| घुक्कणं ... ... ... ... | २१ | ३० | सिसाधयिष्य ... ... | ४० | १५ |
| अन्तस्करणे ... ... ... | २२ | २८ | शतपथ ... ... ... | ४० | २७ |
| विन्देत् ... ... ... | २३ | १५ | अन्तस्करण ... ... | ४० | ३० |
| जमुना ... ... ... ... | २७ | १७ | इत्यादीनि | | |

## ॥ असभ्यलेखनम् ॥

१९--२१--२८--४० पृष्ठेषु वुक्कणपदोक्तिः ।

अज्ञानतिमिरान्धैरित्याद्युक्तिः पृ० ३६ पं० ११ ।

॥ इत्यादि ॥

---

## ॥ समयावधियापनादि ॥

मासद्वयाभ्यन्तरे पत्त्रप्रेषणनियमं स्वीकृत्यापि

चतुर्थपत्त्रस्य मासद्वयात्परतः प्रेषणम् ।

तत्प्रेषणसमयलेखाशुद्धेः स्वकीयलेखद्वारा स्वीकारः पृ० ४२ पं० २३ ।

## ॥ वृथापर्यनुयोगः ॥

पत्त्रप्रेषणसमयावध्यनुल्लङ्घनकारिण्यपि प्रतिवादिनि स-
मयोल्लङ्घनकारित्वाक्षेपः । पृ० ४२ पं० २५

---

## ॥ वेदनिर्णयस्य शोधनपत्त्रम् ॥

| अशुद्धस्य | शोधनम् | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| ऊक्तम् | उक्तम् | १ | २ |
| द्वितिया | द्वितीया | १ | २० |
| देऽब्येषु | दीऽब्येषु | २ | १ |
| पौरुषेवत्वं | पौरुषेयत्वं | ४ | २२ |
| देयाना | देवाना | १५ | १४ |
| प्रमण | प्रमाण | १७ | १८ |
| महर्षिणां | महर्षीणां | १८ | २ |
| ब्राह्मणे | ब्रह्मणो | २१ | १७ |
| धर्म्मारोप्यते | धर्म्मआरोप्यते | ३० | २० |
| पौषकृश्न | माघकृष्ण | ३२ | ८ |

---

शत्रुत्वबुद्ध्यापि जनार्दनादेः
स्मृतिः पुराणैः सुगतिप्रदोक्ता ॥
तत्किं स्वरूपावगमाय वेद-
विमर्श आर्य्येष्टकरो न वेति ॥ १ ॥
जगत्समस्तं त्रिगुणात्मकं चेत्
तदा न दोषाऽऽविलतास्य दोषः ॥
ध्येयः सुधीभिर्गुणितापि यत् स्यात्
संभावितैवास्य पुरोक्तहेतोः ॥ २ ॥

॥ ओ३म् ॥

# ॥ वेदनिर्णयः ॥

## ॥ प्रथमं करोलीप्रश्नपत्त्रम् ॥

॥ श्रीः ॥

श्री १०८ परमहंसपरिव्राजकाचार्य्यदयानन्दस्वामिना निजनिर्मितसत्यार्थ प्रकाशनामके ग्रन्थे--ऊक्तम्--मन्त्रभागस्यैव वेदसंज्ञा न तु ब्राह्मणभागस्य तस्यै-वेतिहासपुराणकल्पगाथानाराशंसीत्यादिसंज्ञा नान्यस्येति ब्राह्मणे वेदसंज्ञाकत्वा-भावः इतिहासपुराणादिसंज्ञकत्वात् वेदव्याख्यानत्वात् ईश्वरभिन्नोक्तत्वाच्चेति हेतुत्रयात् इति। तच्च भ्रममूलकम् असङ्गतं च। तथाहि लोके शास्त्रे च एकस्य व स्तुनः अनेकसंज्ञात्वेन व्यवहारः यथा घटः कलशः द्रव्यमित्यादिनाम्ना व्यवहारः।

अन्यच्च मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनर्षिणोक्तसूत्रेण स्पष्टं प्र-तीयते मन्त्रभागस्य ब्राह्मणभागस्य च वेदसंज्ञा ब्राह्मणभागतोऽन्योभिमतः पुराणेतिहासादिः। अत्र मानं शिरोमान्यगौतमसूत्रभाष्यकारमहर्षेर्वात्स्यायनस्य सूत्रं प्रमाणं समारोपणादात्मन्यप्रतिषेध इति शेषे ब्राह्मणशब्द इति सूत्रम् अस्यार्थः मन्त्रभागावशिष्टे मन्त्रैकदेशे ब्राह्मणशब्दो व्यवह्रीयत इति। प्रजापतेन त्वदेतान्यन्यो विश्वारूपाणि परीता वभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्यामपतयोरयीणाम् अ० २३ मन्त्र ६५ याजुषमंत्रोयम्। प्रजापतेन त्वदेतान्य न्यो विश्वाजातानि परीता वभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्यामपत योरयीणाम् ऋङ्मंत्रोयम्। नवो नवो भवसि जायमानोन्हां केतुरुषसामेष्यग्रं भागं देवेभ्यो विदधास्यायं प्रचन्द्रमास्तिरतेदीर्घमायुरयमाथर्वणमंत्रः। इत्यादि प्रत्येकमंत्रे भिन्नपदश्रवणेन मंत्रे वेदपदस्य पदान्तरादर्थकथनरूपं भिन्नं प्रती-यते न च "द्वितीया ब्राह्मणे" "चतुर्थ्यर्थे बहुलं छन्दसि" "पुराण प्रोक्ते-षु ब्राह्मणकल्पेषु" इति सूत्रेण प्रतीयते पाणिनेर्वेदसंज्ञा ब्राह्मणसंज्ञा पृथगि ष्टेति। अन्यथा द्वितिया ब्राह्मण इत्यनुवृत्त्यैव सिद्धे पुनरुक्तसूत्रे छन्दोग्रहणं

व्यर्थमिति ब्राह्मणे वेदसंज्ञाकत्वाभाव इति वाच्यम् पूर्वसूत्रेण ब्राह्मणभागविषये द्वितीयैव तेन गामस्य तदहः सभायां दीव्येयुरित्युदाहरणम् । उत्तरसूत्रेण तु मन्त्रभागविषये चतुर्थ्यर्थेषष्ठ्येव तेन पुरुषमृगश्चन्द्रमसः पुरुषमृगश्चन्द्रमसे इति सिद्धम् । एतावता ब्राह्मणभागस्य वेदत्वाभावो नायातीति शम् । मि० आषाढ शु० १५ रवौ

अत्र विषये यदि पूर्वपक्षोभिमतश्चेत्तर्हि प्रकाशनीयः ॥

## श्रीशो विजयतेतराम् ।

द्वितीया ब्राह्मणे । २ । ३ । ६० । चतुर्थ्यर्थे बहुलं छन्दसि २ । ३ । ६२ । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । ४ । ३ । १०५ । यहां पाणिनिआचार्य्य वेद और ब्राह्मणको पृथक् २ कहतेहैं पुराण अर्थात् प्राचीन ब्रह्मा आदि ऋषियोंसे प्रोक्त ब्राह्मण और कल्प वेदव्याख्यान है । इससे इन की पुराणेतिसंज्ञा की गई है, यदि यहां छन्द और ब्राह्मण दोनों की वेदसंज्ञा सूत्रकारको अभिमत होती तो " चतुर्थ्यर्थे बहुलंछन्दसि ,, इस सूत्रमें छन्दग्रहण न करते " द्वितीयाब्राह्मणे ,, इस सूत्रसे ब्राह्मण इस पदकी अनुवृत्ति प्रकरणतः प्राप्तहै इससे जानते है कि ब्राह्मणग्रन्थकी वेदसंज्ञा नहीं और यदि छन्दपदसे ब्राह्मणकाभी ग्रन्थ पाणिनिको अभिमत होता तो छन्दो ब्रा० इस सूत्रमें ब्राह्मण ग्रहण क्यों करते केवल छंदसि कहि देते क्योंकि ब्राह्मणभी छन्द ही है । उत्तर । वाह व्याकरणमें भी *आपको बहुत पहुंच है, यह कहना सर्वथा आपका अनुचित है,* देखिये " *द्वि*तीया ब्राह्मण ,, इस सूत्रसे ब्राह्मणविषयकप्रयोगमें अवपूर्वकह और पणधातुके समानार्थक दिवधातुके कर्ममें द्वितीया विभक्ति होतीहै, यथा " गामस्य तदहः सभायां दीव्येयुः ,, यहां शतस्य दीव्यति इत्यादिकी नाईं दिवस्तदर्थस्य २ । ३ । ५८ । इस सूत्रसे गोरस्य ऐसी षष्ठी प्राप्तथी सो यहां गामस्य ऐसी द्वितीया की जातीहै, यहां ब्राह्मणरूपवेदैकदेशहा में द्वितीया इष्ट है न कि मंत्रब्राह्मणात्मक श्रुति छन्द आम्नाय निगम वेद इत्यादि पदसे व्यवहार्य्य समस्त वेदमात्र में, और चतुर्थ्यर्थे बहुलं छन्दसि २ । ३ । ६२ । इस उत्तर सूत्रसे मंत्र ब्राह्मण रूप छन्दोमात्रके विषयमें चतुर्थीके अर्थ में षष्ठीका विधान किया जाता है, पुरुषमृगश्चन्द्रमस इत्यादि इस सूत्रसे छन्दसि इस पद से मंत्र ब्राह्मण रूप समस्त वेदमात्रका संग्रह पाणिनि आचार्यकू अभिमत है । अत एव इसके उदाहरणमें या खर्वेण पिबति तस्यै खर्वो जायते तिस्रोरात्रिरिति तस्या इति प्राप्ते यां मलवद्वासः संभवंति वस्ततो जायते सोभिसस्तो यामरण्ये तस्यै स्तेनो

यां पराचीं तस्यै ह्रीतमुख्यप्रगल्भो याऽस्नाति तस्या अप्सु मारुको याभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको जायते अहल्यायै जार मनाऽऽजैतन्कुः इत्यादि बहुत से ब्राह्मणों ही को भाष्यकारने दिया है। यदि इस सूत्रमें छन्दोग्रहण न रहेगा तो पूर्व सूत्रसे ब्राह्मणे इस पदकी अनुवृत्ति ले आने पर भी केवल ब्राह्मणहीमें षष्ठी होगी वेदमात्रसे नहीं इसकारण इस सूत्र में छंदसि ग्रहणका विशिष्ट फल हैइहै। और ब्राह्मण की भी छन्दोरूपतामें भाष्यकार सम्मत देतेही है फेर इस सूत्रमें छन्दोग्रहणको व्यर्थ कहते हुये आप न्यारे स्वछन्द नहींहै तो और कौनहै और नहींतो मन्त्रे श्वेतवहोक्थशस्पुरोडाशोण्विन् । ३ । २ । ७१ ॥ अवे यजः । ३ । २ । ७२ । विजुपे छन्दसि । ३ । २ । ७३ । ऐसे क्रमिक सूत्रमें पाठसे अन्तिम सूत्रमें छन्दसि ऐसा कहनेसे मंत्रभागमेभी छन्द्रोरूपता न सिद्ध होने पावेगी देखिये जैसे ब्राह्मणे ऐसा कहकर छन्दसि ऐसा कहनेसे ब्राह्मणका छन्दपदमें व्यवहार पाणिनिको अभिमत न ही है ऐसी उत्प्रेक्षा आप करतेहै तैसेही पूर्व सूत्रमें मंत्र ऐसा कह कर विजुपेश्छंदसि ऐसा कहने वाले पाणिनिको मन्त्र भागमें भी छंदसि पदसे व्यवहार अभिमत नहींहै ऐसा कहना पडेगा तब तो ब्राह्मणद्वेषी आपका शिरपर भी महाअनिष्ट आ पडेगा और भी अम्नरुधरवरित्युभयथाछंदसि ८ । २ । ७० । इस सूत्रमे पाणिनिं छन्दसि ऐसा कह कर भुवश्चमहाव्याहृतेः । ८ । २ । ७१ । इस उत्तरसूत्रमें महाव्याहृतेः ऐसा कहतेहै इस्से महाव्याहृतिकी भी छन्दोभावच्युति अवश्य होजायगी क्योंकि ब्राह्मणे ऐसा कह कर छन्दसि ऐसा कहनाही ब्राह्मणका छन्दोभावका अभाव साधन करेगा और छन्दसि ऐसा कह कर महा व्याहृते ऐसा विशिष्ट व्याहृतिका कहना महाव्याहृतिका छन्दोभावका नाशक न होगा ऐसी आंखमें धूरतो आप न ही डारसक्के इस हेतुसे पाणिनि आचार्य प्रयोग साधुत्वके अप्रसंग अतिप्रसंग निवारण करनेकी इच्छासे कही सामान्यसे छंदसि ऐसा कह कर विशेषसे महाव्याहृते ऐसा कहतेहै और कही तो विशेषसे ब्राह्मणे मन्त्रे ऐसा कह कर सामान्यसे छंदसि ऐसा कहतेहै, इससे यदि यहां छन्द और ब्राह्मण दोनो की वेद संज्ञा सूत्रकारको इष्ट न होती तो चतुर्थ्यर्थे बहुलं छन्दसि इस सूत्रमें छन्दोग्रहण क्यो करते क्योंकि द्वितीयाब्राह्मणे इस सूत्रसे ब्राह्मणे इस

पदकी अनुवृत्ति प्रकरणतः सिद्धथी इससे जानतेहैं कि मंत्र ब्राह्मणका नाम वेद है और आपका कहना सभ मिथ्या है ॥

---

## ॥ प्रथमं शाहपुरोत्तरपत्त्रम् ॥

॥ ओ३म् ॥

स्वस्तिश्रीमत्करोलीश—यादवेन्द्रसमाश्रित ।
दामोदरादाप्तविध नमस्ते चन्द्रशेखर ॥ १ ॥

कुशलमुभयत्र परमेश्वरो भावयतु

अथ श्रीमच्छ्रीमदशेषसद्गुणगणगरिष्ठश्रौतस्मार्त्तकर्म्मानुष्ठानतत्परसद्धर्म्मपरिपालकसंस्कृतविद्यानुरागिश्री १०८ मत्करोलीशमहाराजाज्ञया भवद्भिर्ब्राह्मणग्रन्थस्य वेदत्वमस्ति वा नास्तीति विषयनिर्णयाय वनेड़ानगरे पशुपतिद्वारा यत्पत्त्रं प्रेषितं तदुत्तरपत्रमस्मत्परिपालकवैदिकधर्म्मप्रवर्त्तकनिरन्तराग्निहोत्रिशाहपुराधीशमहाराजश्री १०८ मद्राजाधिराजाज्ञानुसारेण लिखितमेतत्पत्त्रेण सह वर्त्तते, तत्सर्वं युष्मन्महाराजेषु निवेदयित्वा तदुत्तरे यादृशी श्रीमतां करोलीशमहाराजानामाज्ञा भवेत् तदनुसारेणोत्तरयन्तु भवन्तः । उत्तरपत्त्रं च विद्वच्छैलपनुसारेण सुविचार्य्य द्विमासाभ्यन्तर एव देयमितिशम् । सं० १९५५ भाद्रकृष्णद्वादश्याम् १२ ।

॥ ओ३म् ॥

पञ्चपञ्चाशदेकोनविंशतितमे विक्रमीयाब्दे आषाढशुक्लपूर्णिमायां वनेड़ापत्तने सत्यार्थप्रकाशग्रन्थान्तर्गतस्य मन्त्रभागस्यैव वेदसंज्ञा न तु ब्राह्मणभागस्येति समुल्लेखस्य समीक्षाकर्त्तुं प्रवृत्तैर्भवद्भिर्यत्पत्त्रं प्रेषितं तत्रोच्यते ।

अपौरुषेयं वाक्यं वेद इति आस्तिकमात्रमान्येन वेदलक्षणात्मकेन मीमांसिकसिद्धान्तेन । न पौरुषेयत्वं तत्कर्त्तुः पुरुषस्याभावादिति अ० ५ सू० ४६ साङ्ख्यसूत्रेण च । मन्त्रभागस्य अपौरुषेयत्वात् ब्राह्मणभागस्य च पौरुषेयत्वात् मन्त्रात्मकसंहिताभागस्यैव वेदसंज्ञा । न तु व्याख्यानात्मकस्य ब्राह्मणग्रन्थस्य । एवं च यावद् ब्राह्मणग्रन्थस्य अपौरुषेयत्वं न सिद्ध्येत्, तावत्कथमपि वक्तुं न शक्यते

ब्राह्मणग्रन्थोपि वेद इति । ब्राह्मणग्रन्थस्य च पौरुषेयत्वे मानं शतपथब्राह्मणे । चतुर्वेदविद्भिर्ब्रह्मभिर्ब्राह्मणैर्महर्षिभिः प्रोक्तानि यानि वेदव्याख्यानानि तानि ब्राह्मणानीति । तस्मान्न ब्राह्मणं वेद इति स्पष्टम् ।

यत्तु भवद्भिर्भगवतः पाणिनेः सूत्राणि प्रमाणे दत्तानि, तैरेव स्पष्टं प्रतीयते वेदातिरिक्तान्येव ब्राह्मणानीति । तद्यथा । छन्दो ब्राह्मणानि च तद्विषयाणी, ति सूत्रे यदि ब्राह्मणमपि वेदश्चेन्न द्वयोर्ग्रहणं न भवेत् । छन्दसा ब्राह्मणस्य ब्राह्मणेन च छन्दसो ग्रहणे सिद्धे पुनरेकस्मिन्नेव सूत्रे किमर्थं द्वयोर्नाम । अत एव द्वितीया ब्राह्मणे । चतुर्थ्यर्थे बहुलं छन्दसि । एतत्सूत्रयोः पूर्वस्मिन् सूत्रे ब्राह्मणे इति कृत्वा उत्तरसूत्रे छन्दसीति पृथक् कृतं नोचेत् द्वितीया ब्राह्मणे एतत्सूत्रात् ब्राह्मणे इत्यनुवृत्त्या उत्तरसूत्रे छन्दसीति व्यर्थं स्यात् । एवं चैतैः सूत्रैर्यो हि वेदो न तद्ब्राह्मणं यच्च ब्राह्मणं न स वेद इति स्पष्टम् । ततश्च यदुक्तं भवद्भिरेकस्य वस्तुनः अनेक सञ्ज्ञात्वेन व्यवहारो यथा घटः कलशः द्रव्यमित्यादिना, तत्तु अतीवाबोधजनकं यथा घट; कलश इति एकस्य वस्तुनो द्वे संज्ञे न तथा वेदो ब्राह्मणमित्यप्येकस्य वस्तुनः संज्ञे । घटशब्देन कलशस्य कलशशब्देन च घटस्य यथा ग्रहणं भवति, न तथा ब्राह्मणशब्देन संहितां संहिताशब्देन वा ब्राह्मणं कोपिगृह्णाति । यथा च श्रुतिर्वेदो मन्त्रः आम्नायश्छन्द इत्यादयः पर्यायवाचकाः शब्दा न तथा ब्राह्मणशब्दोपि पर्यायवाचकः ।

यत्तु मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनीयपरिभाषासूत्रेण ब्राह्मणस्यापि वेदसंज्ञा प्रतीयते, तत्तु यथा छन्दोवत्सूत्राणीति कात्यायनीयपरिभाषासूत्रेण सूत्राण्यपि वेदाङ्गत्वात् वेदतुल्यानि, तद्वद् वेदव्याख्यानतया वेदोपचारात् ब्राह्मणानामपि तत्तुल्यत्वं न तु साक्षात् वेदत्वमिति ।

अथ च शेषे ब्राह्मणशब्दः एतत्सूत्रं प्रमाणे दत्तं तदप्यविचार्यैव । तद्यथा । तच्चोदकेषु मन्त्राख्यैतत्सूत्रेण मन्त्रलक्षणमुक्त्वा ब्राह्मणलक्षणमाह भगवान् जैमिनिः । शेषे ब्राह्मणशब्द इति । तत्रापि शेषलक्षणं किमिति चेत् । शेषः परार्थत्वादिति सूत्रम् । परार्थत्वं च ब्राह्मणानामस्त्येव । परस्य वेदस्य अर्थः परार्थः तस्य भावस्तत्वं वेदार्थत्वमित्यर्थः । तस्मान्न ब्राह्मणानां वेदत्वमिति स्पष्टं मीमांसायां शाबरभाष्ये ।

अथ च प्रजापतेन त्वदेतान्यन्यो विश्वारूपाणीत्यादयस्त्रयो मन्त्राः समुल्लिखितास्तैः किं प्रतिपाद्यते, कस्मै प्रयोजनाय वा तेषामुल्लेख इति किमपि न स्पष्टीकृतम् ।

यच्च भाषापत्रे छन्दः शब्देन ब्राह्मणस्यापि ग्रहणे चतुर्थ्यर्थे बहुलं छन्द-सीती सूत्रस्य भाष्योक्तानि या खर्वेण पिबति तस्यै खर्वो जायत इत्यारभ्य अ-हल्यायै जार इत्येतत्पर्यन्तं यानि उदाहरणानि दत्तानि, तेन तु न पठितं भव-द्भिर्गुरुमुखाद्भाष्यमिति प्रतीयते । यतश्चतुर्थ्यर्थे बहुलं छन्दसीति सूत्रेण चतु-र्थ्यर्थे षष्ठी विधीयते, सा च नैतेषूदाहरणेषु किन्तु प्रत्युत षष्ठ्यर्थे चतुर्थी वर्त्त-ते । सा च षष्ठ्यर्थे चतुर्थी वक्तव्येति भाष्योक्तवार्तिकेनेतिदिक् ॥

सं० १९५५ भा० कृ० १२ } ह० राजगुरु-यमुनादत्तशर्म्मणः ।
राजधानी शाहपुरा, राजपूताना ।

---

## ॥ द्वितीयं करोलीपत्रम् ॥

ॐ तत् सत् ब्रह्मणे नमः ।

यो ध्येयो निगमागमैरनुदिनं मोक्षप्रदो ज्ञानिनां
योगाक्रांतधियामनन्यमनसां ज्ञानाङ्कुरोत्पादकः ॥
स्वर्गावाप्तिकरो यथेप्सितफलप्राप्तिप्रदो नित्यशः
सदेवोभिनवं फलं करुणया दद्यात्परत्रेह च ॥ १ ॥

स्वस्तिश्रीयुतसर्वोपमाविराजमानराजमान्यशाहपुराधिनाथमहाराजतो लब्धजीवक दयानंदमतमंडनप्रवृत्त पं० जमुनाप्रसादशर्मन् त्वय्यनन्ता न-मस्कारपङ्क्तय. ॥

अथ सिद्धिश्रीलसर्वोत्तमोपमार्हविविधविरुदावलीविराजमानवेदोक्तसत्क र्मानुष्ठानपरायणधन्यमान्यौदार्याद्यनेकगुणगणमण्डितनिजकुलकमलप्रकाशनैकप्र चंडमार्तंडसद्धर्मप्रवर्तकपरमोदारसंस्कृतविद्याभिलाषिश्री १०८ युतशाह-पुराधिनाथमहाराजानां सन्निधौ तत्कृतप्रश्नोत्तरसूचनार्थब्राह्मणग्रन्थस्य वे-दत्वमंगीकृत्य बंदेड़ाह्वयनगरे पं० पशुपतिशर्म्मद्वारा करोलीनरेशमहाराजनिदे-शेन यदस्माभिर्निवेदितं पत्रं तदुत्तरपत्रं सार्द्धमासव्यतीतानन्तरमस्मद्विप्रा-र्नायिकधर्मतत्पराखण्डप्रतापैश्वर्याद्यनेकगुणगणसमवायसमलंकृतानिरस्तस्व-परवाह्यान्तस्करणवृत्यज्ञानतिमिरपटलब्रह्मपरायणधर्मावतारकल्याणपुरीश्वर-यादवेंद्रनृपकुलरत्नमहाराजाधिराजानां सनातनधर्मप्रबोधिन्यां सभायां समाग-

समिति तदवलोच्य दत्तसम्मतिकाय श्रीमहाराजाय संनिवेद्य च तदभ्यनु-
ज्ञावशंवदैरस्माभिर्भवत्प्रेषितपत्रोत्तरपत्रखण्डनविषयपरं पत्रं संप्रेष्यते इत्येतत्प-
श्नोत्तरप्रत्युत्तरं निजनृपसम्मत्या सम्यगालोच्य विद्वल्लेखनपरिपाटीक्रमेण नि-
म्नलिखितविषयाणां दीर्घसूत्रिभिर्भवद्भिरविलंबेन प्रेषणीयम् ।

अथ अपौरुषेयं वाक्यं वेद इति वेदलक्षणात्मकेन मीमांसासूत्रेण । न पौरुषेयत्वन्त-
त्कर्तुः पुरुषस्याभावादिति सांख्यसूत्रेण चाचतुर्वेदाविद्भिर्ब्रह्मभिर्ब्राह्मणैर्महर्षिभिः प्रोक्ता-
नि यानि वेदव्याख्यानानि तानि ब्राह्मणानीति शतपथब्राह्मणवचनेन चामन्त्रभाग-
स्यैव वेदत्वमङ्गीकुर्वन् ब्राह्मणभागस्य वेदत्वाभावस्संसाध्यते । वेदव्याख्या-
नत्वात् महर्षिभिः प्रणीतत्वात् पौरुषेयत्वादिति हेतुत्रयेण तत्त्वतीव मोहज-
नकम् । यतो वेदव्याख्यानत्वादिति हेतुस्सोपाधिग्रस्त इति न ब्राह्मणभागस्य
वेदत्वाभावसाधने साधको भवेत् । तथाहि । यत्र यत्र महाभारतादौ वे-
दत्वाभावस्तत्र तत्र स्मर्यमाणकर्तृत्वरूपसाध्यव्यापकत्वमप्यस्ति वेदव्याख्यान-
त्वन्तु सर्वमन्त्रेऽस्ति तत्र स्मर्यमाणकर्तृत्वं नास्तीति साधनाव्यापकत्वस्य वर्त-
मानतया भवति स्मर्यमाणकर्तृत्वं सोपाधिकमिति वेदव्याख्यानत्वादिति हेतु-
र्नानुमापयेत् ब्राह्मणभागे वेदत्वाभाव इति किंचायं हेतुरनैकान्तिकोऽपि वेदव्या-
ख्यानं नाम वेदपदव्यपदेश्यवाक्यकलापस्य पदान्तरेणार्थकथनम् तच्चेदं प्र-
जापतेन त्वदेतान्यन्यो विश्वारूपाणि परिता बभूव यत्कामास्ते जुहुमस्तन्नो
अस्तु वयं स्याम पतयो रयीणामिति याजुषो मन्त्रः ॥ प्रजापतेन त्वदेतान्य-
न्यो विश्वाजातानि परिता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं
स्याम पतयो रयीणामित्यृचः ॥ नवोनवो भवसि जायमानोन्हां केतुरूषसा मेष्य-
ग्रम् । भागन्देवेभ्यो विदधास्यायम्प्रचन्द्रमा स्तिरतेदीर्घमायुरित्याथर्वणः । न-
वोनवो भवति जायमानोन्हां केतुरुषसामेत्यग्रम् भागन्देवेभ्यो विदधात्यायम्प्र-
चन्द्रमा स्तिरतेदीर्घमायुरित्यृचः । एवमाद्ययोर्मन्त्रयोर्विश्वारूपाणीति पदघटि-
ताद्यमन्त्राद्विश्वाजातानीति पदघटितस्य द्वितीयमन्त्रस्य चरमयोश्च भवसि
जायमान इति उषसामेष्यग्रमिति विदधास्यायन्निति च विलक्षणपदघटिता-
द्यमन्त्राच्चतुर्थमन्त्रस्य भवति जायमान इति उषसामेत्यग्रमिति विदधात्या-
यमिति च विलक्षणपदघटितत्वेन वेदानां भिन्नतया पदान्तरेणार्थकथनरूपस्य
वेदव्याख्यानत्वस्य दुरूपन्हवतया तदन्तर्भावेणैवानैकान्तिकत्वम्बोध्यम् ॥

यश्च द्वितीयो हेतुः ऋषिभिः प्रणीतत्वादिति सोऽपि ब्राह्मणभागस्य वेद-
त्वाभावप्रयोजको न भवेत् ऋषिप्रोक्तत्वस्य साधारण्येन ऋगादावपि विद्य-

मानत्वात् तत्रापि ब्राह्मणवदृषिभिः पठितत्वमस्त्येवेति द्वितीयहेतुनापि ब्राह्मण भागस्य वेदत्वाभावो नो सिद्धः न चोच्यतां ऋषिप्रोक्तत्वपदेन नास्माकमृषिपठितत्वमित्यर्थोऽभिप्रेतः किन्तु ऋषिप्रणीतत्वरूपोऽर्थोऽभिमत इति तथापि ऋषिप्रणीतत्वादिति हेतुः स्वरूपासिद्धो जात इति विचार्यम् न च भारद्वाजाङ्गिरोवसिष्ठ पुलहयाज्ञवल्क्यजनकादीनामृषीणां संवाददर्शनेन ब्राह्मणभागस्य ऋषिप्रणीतत्वं स्पष्टं प्रतीयते इति वाच्यम् । लौकिकानामर्थपूर्वकत्वादिति कात्यायनप्रातिशाख्ये प्रतिपादितत्वात् तदर्थश्च लौकिकानां गामभ्याजशुक्लांदण्डेनेत्यादिवाक्यानां प्रयोगोयथाऽर्थपूर्वको भवति अर्थात् प्रयोक्तारो वक्तव्यार्थाननुसंधाय प्रयोगं कुर्वन्ति न तथा वैदिकवाक्यकलापानामर्थपूर्वकप्रयोगस्संघटते तेषां नित्यत्वात् तथा च वेदो यदि वस्तुसत्तामनपेक्ष्या लोकवृत्तमव बोधयन् याज्ञवल्क्यजनकादीनामपि संवादकथने प्रवृत्तश्चेत्का वो हानिः । अन्यथा सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्यादिसंहिताभागस्याप्यवेदत्वापत्तिर्भवेत् । यथा जनकादिसंवाददर्शनेन ब्राह्मणभागस्य जनकाद्युत्पत्तिकालानन्तरमुत्पत्तिसमुत्प्रेक्षणं क्रियते तथा सूर्य्याचन्द्रमसावित्यादिश्रुतीनामपि सूर्य्यचन्द्रमसोरुत्पत्तिकालानन्तरमुत्पत्तिसंभावना स्यादित्यनित्यत्वं संहिताभागेपि प्रतीयते ऋषिभिः प्रणीतत्वादिति हेतुर्ब्राह्मणभागस्य वेदत्वाभावप्रयोजको न भवेदिति तत्वविदां विमर्शः ॥ यश्च तृतीयो हेतुरुपदिष्टः पौरुषेयत्वादिति सोप्यसाधकः पौरुषेयत्वादित्यस्यार्थः ईश्वरभिन्नोक्तत्वादिति स च पुनरुक्तिदोषग्रस्तः यत ईश्वरभिन्नोक्तत्वे पौरुषेयत्वे च न कश्चन भेद इति हेतुत्रयगर्भितचतुर्वेदविद्भिर्ब्रह्मभिर्ब्राह्मणैर्महर्षिभिः प्रोक्तानि यानि वेदव्याख्यानानि तानि ब्राह्मणानीति शतपथब्राह्मणवचनप्रामाण्येन ब्राह्मणस्य वेदत्वाभावं प्रबोधयिषया ये प्रवृत्तास्ते परास्ताः ॥ १ ॥

अथ ब्राह्मणभागस्यावेदत्वे द्वितीया ब्राह्मणे २ । ३ । ६० । चतुर्थ्यर्थे बहुलं छन्दसि २ । ३ । ६२ । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ४ । ३ । १०५ । छन्दो ब्राह्मणानि च तद्विषयाणि ४ । २ । ६२ इत्यादीनि भगवतः पाणिनेराचार्यस्य सूत्राणि प्रमाणतो भवद्भिरुपन्यस्तानि तानि चार्थानवबुध्यैवोपन्यस्तानि तथाहि द्वितीया ब्राह्मण इति सूत्रेण ब्राह्मणविषयके प्रयोगे द्वितीया न तु वेदमात्रे एतदुदाहरणं गामस्य तदहस्सभायां दीव्येयुरिति अत्र दिवस्तदर्थस्येति सूत्रेण शतस्य दीव्यतीत्यादिवद्धोऽस्येति षष्ठी प्राप्ता तां बाधित्वा निरुक्तसूत्रेण द्वितीया भवति अत्र मन्त्रैकदेशे ब्राह्मणात्मके भागे द्वितीयेष्टा न हि श्रुत्याम्नाय-

निगमवेदछन्द इत्यादिपदेन व्यवहार्यमाणे समस्ते वेदे इति भाष्यकृदाशयः । एवमुत्तरसूत्रेण चतुर्थ्यर्थे बहुलं छन्दसीत्याकारकेण सूत्रेण मन्त्रात्मके ब्राह्मणात्मके च वेदे चतुर्थ्यर्थे षष्ठी विधीयते एतदुदाहरणं यथा पुरुषमृगश्चन्द्रमसो गोधाकालकादार्वाघाटास्ते वनस्पतीनामिति वनस्पतिभ्य इत्यर्थः तदुपरि षष्ठ्यर्थे चतुर्थीति वाच्यमिति भाष्यकारेण वार्तिकम्पठित्वा या खर्वेण पिबति तस्यै खर्वो जायते तिस्रो रात्रिरिति तस्या इति प्राप्ते यां मलवद्वाससम्भवन्ति यतस्ततो जायते सोभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यप्रगल्भो या स्नाति तस्या अप्सु मारुको याभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपस्मारी याङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि कृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको जायते अहल्यायै जारमनाय्यै तन्तुरित्यादि बहूदाहरणानि ब्राह्मणग्रन्थस्यैव दत्तानीतिछन्दसीति पदस्वारस्येन मन्त्रब्राह्मणात्मकेऽखिले वेदे षष्ठ्यभिमताऽऽचार्याणामिति प्रतीयते तथा च यद्यस्मिन्सूत्रे छन्दोग्रहणं न स्यात्तर्हि पूर्वसूत्राद् ब्राह्मण इति पदस्यानुवृत्तावपि केवलब्राह्मणभागे एव सूत्रविहितषष्ठी वार्तिकविहितचतुर्थी च स्यान्न तु वेदमात्र इति छन्दोग्रहणस्य विशिष्टं फलमस्त्येवेति सुविचार्यम् । अत एव मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन् । अवेयजः ३ । २ । ७२ विजुपेश्छन्दसि ३ । २ । ७२ इत्यादिसूत्राणां क्रमिकपाठे चरमसूत्रघटितछन्दसीति कथनेन मन्त्रभागेपि छन्दोरूपतां न सिध्येत् तथा हि ब्राह्मण इत्युक्त्वा पश्चाछन्दसीति प्रतिपादनेन ब्राह्मणग्रन्थस्य छन्दःपदेन व्यवहारानभिमतपाणिनिरित्युत्प्रेक्षा यथा भवद्भिः क्रियते तथैव पूर्वसूत्रे मन्त्रे इति प्रतिपाद्य पश्चाद्विजुपेश्छन्दसीति वक्तुः पाणिनेर्मन्त्रभागेपि छन्दःपदेन वेदत्वनिष्पत्तिः स्पष्टतया प्रतीयते एवं अम्नरुधवरित्युभयथा छन्दसि ८ । २ । ७० इति सूत्रे छन्दःपदकथनानन्तरं भुवश्च महाव्याहृत्तेः ८ । २ । ७१ । इत्युत्तरसूत्रे महाव्याहृतेरिति कथनेन महाव्याहृतेरपि छन्दोभावच्युतिरवश्यं भवेत्तस्माद्ब्राह्मणस्य वेदत्वाभावमुत्प्रेक्षमाणा निरस्ताः ॥

यदुच्यते छन्दो ब्राह्मणानि च तद्विषयाणि, इति सूत्रे छन्दो ब्राह्मणानीति कथनेन ब्राह्मणभागे मन्त्रभागे च छन्दोभावस्य सामान्यतो ग्रहणे पृथग्ब्राह्मणग्रहणं वा छन्दोग्रहणं व्यर्थमिति तदतिस्थवीयं तथाहि अधिकमधिकार्थमिति न्यायेन ब्राह्मणविशेषपरिग्रहार्थं पृथग्ब्राह्मणग्रहणं, याज्ञवल्क्येन प्रोक्तानि ब्राह्म-

णानि याज्ञवल्क्यानि सौलभानीति प्रयोगेण पूर्वोक्तनियमो नाभूत् अत एव व्याकरणभाष्यकारोपि याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्य इति वार्त्तिकं संकथयन् ब्राह्मणग्रहणस्येदमेव प्रयोजनं सूचितमिति भावः। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु इत्यस्मिन्सूत्रे ब्राह्मणस्य विशेषणं पुराणप्रोक्तत्वमिति कथयन् पाणिनेरयमर्थोऽभिमतः इत्यवगम्यते अन्यथा यदि ब्राह्मणस्य विशेषपरिग्रहं कर्त्तुमभिप्रायो न भवति तर्हि पुराणप्रोक्तेषु इति कथनमात्रेणैवाऽऽचार्यप्रवृत्तिर्व्यर्थतां गच्छेदिति ज्ञायते। अस्माभिर्गुरुमुखान्नाधीतं भाष्यम् भवन्तस्तु षट्शास्त्रिणोऽखिलं भाष्यमधीत्य दयानन्दमतस्थापनार्थं समुद्यता इति ज्ञायते। किमधिककथनेनेति सम्यगाशयमेतत्पत्रस्थस्य विषयस्यालोच्य सुविचार्य चोत्तरं प्रेषणीयम् अत एव मन्त्रभागवद् ब्राह्मणभागस्यापि प्रामाण्यं पुराणप्रामाण्यव्यवस्थापनार्थं प्रमाणेन खलु ब्राह्मणेतिहासपुराणानां प्रामाण्यमभ्यनुज्ञायते इति वात्स्यायनमहर्षिणाप्रोक्तं तत्र यदि ब्राह्मणस्य स्वतः प्रामाण्यं न स्यात्तर्हि कथमन्यस्य प्रामाण्यबोधकत्वं तत्र संभवति कुतः ब्राह्मणभागो यदा स्वयं प्रमाणपदमारुढुमसमर्थस्तर्हि कथमितिहासपुराणानां प्रामाण्यव्यवस्थायां समर्थो भवेत् अत एव लोकप्रसिद्धमाख्यानं स्वयमसिद्धः कथं परान्साधयिष्यतीति तस्माच्छ्रुत्याम्नायनिगमादिपदेन मन्त्रभागमारभ्योपनिषत्पर्यन्तवेदबोधकोवगम्यते इति मार्मिकविदुषां परामर्शः। अत एवास्तिकजनशिरोधार्यभगवान्मनुर्महर्षिः श्रुतीनां वेदत्वं धर्मशास्त्राणां स्मृतित्वं संकथयन्नाह।श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिरिति।अत एव वेदान्तचतुरध्याय्यां भगवान् व्यासदेवः उपनिषदां कथनेच्छया श्रुतेस्तु शब्दमूलत्वात् अ० २ पा० १ सू० २७। पादात्तु तच्छ्रुतेः २।३।४१। भेदश्रुतेः ३।४।१८। सूचकश्च हि श्रुतिराचक्षते तद्विदः ३।२।४ तदभावोनाडीषु तच्छ्रुतेः ३।२ ६४। वैद्युतेनैव ततस्तच्छ्रुतेः ४।३।६। इत्यादिसूत्रेषु पुनः पुनः श्रुतिपदेन शब्दपदस्योपादानं करोति अत एवोक्तं एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्।विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतिरिति। तथा च ब्राह्मणग्रन्थस्य वेदत्वसिद्धौ न कोपि विवाद इति ज्ञेयम्। अथ छन्दोवत्सूत्राणीति।वृद्धिरादैजिति सूत्रस्थभाष्योक्तसूत्रेण यथा सूत्राणां वेदाङ्गत्वं तथा मन्त्रब्राह्मणयोर्वेदनामधेयमिति सूत्रेण ब्राह्मणभागस्य वेदतुल्यत्वं न तु साक्षाद्वेदत्वमिति प्रतिपादनन्तु अनभिज्ञपदमारुरुक्षूणां भवतामस्माकं प्रतारणायेति स्पष्टं प्रतीयते। यतश्छन्दोवत्सूत्राणि मन्त्रब्राह्मणयोर्नामधेयमित्यनयोर्महान्भेदः। तथा हि छन्दोवदित्यतिदेशशास्त्रं तत्वं

च वदूघटितत्वमिति सामान्यलक्षणकं न तथा मन्त्रब्राह्मणयोरित्यस्यातिदे-
शत्वं घदूघटितत्वाभावात् । किं च यथा गुरोः स्थाने शिष्यो याज्यकुलानि
गत्वाऽग्रासादीनि लभते इति यो यस्य स्थानापन्नः स तं धर्मं लभते
गुरुवद् गुरुपुत्रेषु मन्तव्यमिति भाष्यकारोक्त्या सूत्राणि छन्दःप्रयुक्त-
कार्याणि लभंते । तथा वेदेऽपि ब्राह्मणात्मके वेदतुल्यत्वं अर्थाद्वेद-
प्रयुक्तव्यवहारो ब्राह्मणात्मकेपि भवति तथा च मंत्रभागे ब्राह्मणभागेपि भवदु-
क्त्यैव वेदत्वं सिद्धम् । ब्राह्मणग्रंथानामेव पुराणेतिहासादिनामास्ति न ब्रह्म-
वैवर्तश्रीमद्भागवतादीनामित्यपि न हि वक्तुं शक्यते । सप्तद्वीपा वसुमती त्रयो
लोकाश्चत्वारो वेदास्साङ्गास्सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखास्स-
हस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृचं नवधाथर्वणो वेदो वाको वाक्य-
मितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषय इति व्याकरणमहा-
भाष्यस्य प्रथमान्हिके भगवता पतंजलिनोक्तत्वात् अत्र वैद्यकसाहचर्यादिति-
हासपुराणयोरपि स्मृतिरूपयोरेव ग्रहणस्य स्पष्टमवधारणेन ब्राह्मणग्रंथादन्यः
पुराणेतिहासादिः न चोच्यतां ब्राह्मणग्रन्थेष्वितिहासादीनामन्तर्भाव इति एव-
मिमे सर्वे वेदा निर्मितास्सकल्पास्सरहस्यास्सब्राह्मणास्सोपनिषत्कास्सेति-
हासास्सान्वाख्यातास्सपुराणास्सस्वरास्ससँस्कारास्सनिरुक्तास्सानुशासनास्सा-
नुमार्जनास्सवाकोवाक्यास्तेषां यज्ञमभिपद्यमानानां छिद्यते नामधेयं यज्ञ इत्ये-
वमाचक्षते इति गोपथब्राह्मणपूर्वभागे द्वितीयप्रपाठकस्थं ब्राह्मणं स्फुटमप्रमाणं
स्यात् तस्माद्ब्राह्मणातिरिक्तमितिहासं पुराणं चेति सिद्धम् । अथ शेषे ब्राह्म-
णशब्द एतत्सूत्रोपरि भवद्भिर्यदुक्तं तच्चासंगतम् । तथा हि । समस्तवैदिक-
शिरोमान्यपूर्वमीमांसादर्शने २ द्वितीयाध्याये १ पादे द्वात्रिंशत्तमे सूत्रे मन्त्र-
लिलक्षयिषयाऽऽचार्यः प्राहस्म तच्चोदकेषु समाख्या शेषे ब्राह्मणशब्द इति
च अत्र हि शेषे ब्राह्मणशब्द इति द्वितीयसूत्रोक्त्या शेषे मन्त्रभागावशिष्टे वे-
दैकदेशे ब्राह्मणशब्दोभिमत इत्यर्थाद्वेदस्य मन्त्रात्मकत्वं ब्राह्मणात्मकं चेत्युभ-
यं सिद्धम् यद्याचार्यो वेदैकदेशत्वं नाभिमन्येत कथमसौ व्यधास्यत शेषे ब्रा-
ह्मणशब्द इति न हि भारतादीनां शेषो रामायणं कोपि ब्रूते तस्माच्छेषपदेना-
चार्याणां ब्राह्मणभागे वेदत्वमभिमतमित्यवगम्यते अत एव ब्राह्मणनिर्वचनाधि-
करणे अथ किं लक्षणं ब्राह्मणं मन्त्राश्च ब्राह्मणश्च वेदस्तत्र मंत्रलक्षणे प्रतिपा-
दिते परिशेषसिद्धत्वाद्ब्राह्मणलक्षणमनिर्वचनीयम् मंत्रलक्षणवचनेनैवसिद्धं य-
स्यै तल्लक्षणं न संभवति तद्ब्राह्मणमिति परिशेषसिद्धं ब्राह्मणमिति व्याचख्युरा-

चार्याश्शवरस्वामिनः । अत एव भगवान् जैमिनिरपि निरुक्तसूत्रद्वयेन मन्त्र ब्राह्मणात्मकमखिलं वेदमालोचयित्वा तदेकदेशभूता ऋचस्तेषामृग्यत्रार्थवशेन पादव्यवस्था इति सूत्रेण पंचत्रिंशतमेन ऋचः गीतिषु सामाख्या इति षट्त्रिंशत्तमेन सामानि शेषे यजुश्शब्द इति सप्तत्रिंशत्तमेन यजूंषि लक्षयामास ततश्च यजुषोप्येकदेशन्निगदो वा चतुर्थं स्याद्धर्मविशेषादित्यष्टत्रिंशत्तमेन यजुर्विशेषं निगदमलक्षयत् । यद्ययमाचार्यो ब्राह्मणानां वेदपदार्थत्वं नाभिमन्येत ततश्चोदकेषु समाख्या इत्येतन्मन्त्रलक्षणानन्तरमेव ऋगादींल्लक्षयेत् लक्षयति चायं मन्त्रानन्तरं शेषेब्राह्मणशब्द इति ब्राह्मणमेव ततोस्यावश्यमेव ब्राह्मणानां वेदपदार्थत्वमभिमतमिति प्रेक्षावतो जैमिनेराचार्यस्याभिप्रायोऽवगन्तव्यः ॥ किं च त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोस्सह । यजुर्वेदः स विज्ञेयश्शेषाः शाखान्तराः स्मृता इति चरणव्यूहोक्तेन ब्राह्मणग्रन्थस्य वेदत्वं स्पष्टं प्रतीयते । अथ शेषः परार्थत्वादितिसूत्रस्य परस्य वेदस्य अर्थः परार्थस्तस्य भावस्तत्वन्तस्मादित्यर्थ इति यदुक्तं तदपि न सम्यक् यतो नाभिमतो भवदुक्तोर्थ आचार्याणां किं तु परस्मिन् परमात्मन्यर्थः प्रयोजनो यस्येति परार्थ स्तस्य भावस्तत्वन्तस्मादित्यर्थोऽभिमतस्तथा च शेषो मन्त्रभागादवशिष्टो ब्राह्मणात्मको भागो वेदः परार्थत्वादिति हेतोस्ततश्च ब्राह्मणभागस्य वेदत्वे न कश्चन विरोधोस्तीति शम् । अथ यदुक्तं भवद्भिः एकस्य वस्तुनः अनेकसंज्ञात्वेन व्यवहार इत्यस्योपरि यथा लोके घटशब्देन कलशस्य कलशशब्देन घटस्य बोधो भवति न तथा ब्राह्मणशब्देन संहितां संहिताशब्देन ब्राह्मणं कोपि गृण्हातीति तदयुक्तम् कोशे बह्वर्थेषु एकस्य शब्दस्य शक्तिर्नियतास्तीति नह्येकदैव सर्वेषामर्थानां बोधो भवति तथा अनेके शब्दा एकत्रार्थे नियुक्तास्सन्ति तथा च न हि लोके सर्वे व्यवहृताः भवन्ति किन्तु केचिद् व्यवहृताः केचिन्नेति इतिहासपुराणत्वं प्रतिपादयन् ब्राह्मणं यदि वेदत्वं प्रतिपादयति तर्हि नास्त्यपराध इति ब्राह्मणभागस्यापि वेदत्वं सम्यक् तरत्वेन सिद्धम् । भवत्प्रेषितपत्रे ये ये विषयास्सन्ति तेषां सर्वेषां खण्डनपरमिदंपत्रम् । श्रीमद्भिः कुवाच्यविषयमपहाय विद्वच्छैलीमनुसृत्य लेखनीयं यतो हास्यास्पदं न भवेदिति विचारणीयम् ।

व्याकरणाचार्यः पं० चन्द्रशेखरशर्म्मा—भाद्र शुक्ल २ शुक्र सं० १९५५ ।

कृतसम्मतिकमहाराजाज्ञाप्रतिपालनपरमिदम्पत्रम् । कुशलमुभयत्रास्तु

राजधानी करोली ॥

## ॥ द्वितीयं शाहपुरापत्त्रम् ॥

## ॥ ओ३म् ॥

स्वस्तिश्रीमदनेकसद्गुणगणैरालङ्कृतःशोभनै-
र्विद्यावारिधिवीचिधौतविमलाऽऽलापप्रसन्नः सुधीः ॥
गृह्णीयान्निजमित्रकैरवगणप्रोत्फुल्लचन्द्रोदयः
श्रीमत्पण्डितचन्द्रशेखर इतो मत्प्रेषितां सन्नतिम् ॥ १ ॥

## कुशलमुभयत्रेश्वरो वितनोतु ॥

द्वितीयपत्त्रं वोऽस्माभि--रालोच्येतस्तदुत्तरम् ॥
निवेदयन्तु विद्वांसो यादवाधीशसन्निधौ ॥ २ ॥

अहो भवन्तो मूलमपहाय शाखासु प्रच्छन्नाय परमाप्तर्षीणामपि वचनान्युल्लङ्घ्य पलायन्ते। तथाह्यस्माभिः खलु अपौरुषेयत्वेन वेदमङ्गीकृत्य तस्य चापौरुषेयत्वे परमाप्तमहर्षेः कपिलदेवस्य "न पौरुषेयत्वं तत्कर्त्तुःपुरुषस्याभावात्–इति सूत्रं प्रमाणे दत्त्वा ब्राह्मणानां च पौरुषेयत्वं शतपथब्राह्मणवचनप्रामाण्येन कथितम्।तदुपरि भवन्तो ब्राह्मणानामपौरुषेयत्वे किमपि दृढतरप्रमाणमदत्त्वा केवलं निजमनसैव अस्मदुक्तमहर्षिवचनघटितशब्दान् हेतुतयोपन्यस्यानुमानाकारं विधाय तानेव हेतून् सोपाधिकानैकान्तिकस्वरूपासिद्धान् कथयन्तीति भवतां पलायनम्। परं वयमप्यधीतन्यायदर्शनास्तत्रापि भवदुक्तेः समीक्षां करिष्यामः।

प्रथमतस्तूच्यतां भवद्भिर्ब्राह्मणानां पौरुषेयत्वमस्ति वा नास्ति। नास्तिचेत्केन प्रमाणेन,अस्ति चेत् ब्रुवन्त्वस्तीति।अन्यच्च यदि भवद्भिर्ब्राह्मणानामपि वेदत्वमङ्गीक्रियते तर्हि वेदवचनस्य परममान्यत्वाच्छतपथब्राह्मणवचनेन ब्राह्मणानां वेदव्याख्यानतया पौरुषेयत्वाङ्गीकारे कथं न दीर्घसूत्रित्वं परित्यज्यते। पौरुषेयत्वं नाम।प्रमाणान्तरेणार्थमुपलभ्य पुरुषनिर्मितत्वं हि पौरुषेयत्वम्।तच्च ब्राह्मणानामेव न तु वेदस्य।तद्यथा।तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायतेति मन्त्रेण, अग्निवायुरविभ्यस्तु त्रयं ब्रह्म

सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणमिति मनुवचनेन च, तथा तैत्तिरीययजुरारण्यके स ह वै उपनिषादि "आजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्ष त ऋषयोऽभवन् तदृषीणामृषित्वमिति श्रूयते।अस्यार्थः।स्वयम्भु प्रमाणान्तरमनुपजीव्य स्वयं भूतं स्वतः प्रमाणभूतमितियावत् ब्रह्म वेदः तपश्चरतोऽजान् अयोनिसम्भवान् पृश्नीन् पुरुषान् प्रति अभ्यानर्ष अभिजगाम । ऋषी गतौ तुदादिः परोक्षे लिट् अतस्त ऋषयोऽभवन्नित्यर्थः । तथा ऐतरेयब्राह्मणेऽपि प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवम् तान् लोकानभ्यतपत् तेभ्योभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत् तेभ्योभितप्तेभ्यस्त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात् तान् वेदानभ्यतपत् तेभ्योभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात् स्वरिति सामवेदात् तानि शुक्राण्यभ्यतपत् तेभ्योभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तदेतदोमिति । एतद्ब्राह्मणपर्यालोचनया च प्रजापतिरेवाग्रे स्वतपः प्रभावेण सप्रणवव्याहृतिकां त्रयीमपश्यत् । ततः परं यथायथं निजतपोबलेन तैस्तैः ऋषिभिस्ते ते मन्त्रादिभागा ऋग्यजुःसामलक्षणाः परमेश्वरप्रसादतो लब्ध्वा यथास्थितस्वर्णानुरूपं लोकेत्र प्रकटिता इति प्रतीयते।एतेन वेदस्योत्पन्नत्वमात्रबोधनेन प्रमाणान्तरेणार्थमुपलभ्य पुरुषरचितत्वाबोधनान्न वेदस्य पौरुषेयत्वम् । अर्थात् ईश्वरो हि सर्वज्ञत्वाद् गतकल्पीयं वेदमस्मिन् कल्पे पुनरुपदिशति । अत एव तस्यादित्वमपि ॥

ततः कालान्तरेण तं वेदमभ्यस्य तस्मादेव वेदादर्थमुपलभ्य ऋषिभिर्ब्राह्मणानि निर्मितानीति स्पष्टमेव ।

स च वेदः कियानिति चेत् यद्यपि श्रुतिस्मृत्यादिवाक्येषु वेदत्रयी संकीर्त्यते, तथापि बहुषु स्मृतिपुराणादिवाक्येषु सर्वार्थवेदको वेदश्चतुर्धा भिद्यते क्रमात् । ऋग्वेदोथ यजुर्वेदः सामवेदो ह्याथर्वण इत्यादिवचनबलेन चतुर्धेति कथ्यते।तथा च चरणव्यूहे।चत्वारो वेदा विज्ञाता भवन्तीति स्थितम्।व्याकरणमहाभाष्येपि "महान् शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा

सामवेद एकविंशतिधा बह्वृचा नवधाथर्वणो वेद इति । एवं चातुर्वेद्यस्यापि मानमुक्तं चरणव्यूहे ॥

ऋचां दशसहस्राणि ऋचां पञ्च शतानि च । ऋचामशीतिः पादश्च तत्पारायणमुच्यते ॥ इति ऋग्वेदस्य । द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके सच-न्मानेन सङ्ख्यातं वालखिल्यं सशुक्रियमिति यजुर्वेदस्य । अष्टौ सामसहस्राणि सामानि च चतुर्दश । ऊह्यानि सरहस्यानीत्येतत्सामगणः स्मृतः ॥ इति सामवेदस्य । द्वादशानि सहस्राणि मन्त्राणां त्रिशतानि च । गोपथं ब्राह्मणं वेदेऽथर्वणे शतपाठकम् ॥ इत्यथर्वणस्य।ततश्चैतावन्मानात्मकः संहिताभाग एव स एव चापौरुषेयो वेद इति ॥

ब्राह्मणानि तु प्रमाणान्तरेण वेदेनार्थमुपलभ्य पुरुषनिर्मितानीति तेषां पौरुषेयत्वं, "चतुर्वेदविद्भिर्ब्रह्मभिर्ब्राह्मणैर्महर्षिभिः प्रोक्तानि यानि वेदव्याख्यानानि तानि ब्राह्मणानीति शतपथब्राह्मणवचनवलेन स्पष्टमेवेति न तेषां साक्षाद्वेदसंज्ञा भवितुमर्हति ॥ अत एव तैत्तरीयब्राह्मणेपि "यदृचोऽध्यगीषत ताः पय आहुतयो देवानामभवन् यद्यजूंषि घृताहुतयो यत्सामानि सोमाहुतयो यदथर्वाङ्गिरसो मध्वाहुतयो यद्ब्राह्मणानि इतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेद आहुतयो देवानामभवन्नित्यादिवचनेन ब्राह्मणानां वेदतो न्यूनत्वं पुराणादिभिश्च समत्वं प्रतिपाद्यते ॥

यथा च ब्राह्मणानां वेदव्याख्यानत्वं तदपि दर्श्यते ।

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा । इत्ययं मन्त्रः । एतन्मन्त्रस्य व्याख्यानरूपं ब्राह्मणम् । स जुहोति अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति अथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्सत्येनैव हूयते यदा ह्येव सूर्योऽस्तमेति अथाग्निर्ज्योतिर्यदा सूर्य उदेति अथ सूर्यो ज्योतिर्यद्वै सत्येन हूयते तद्दिवं गच्छति । तदुहैतदेवारुणये। ब्रह्मवर्चसकामाय तक्षानूवाचाग्निर्वर्चो ज्योतिर्वर्चः इति ब्रह्मवर्चसीहैव भवति य एवं विद्वानग्निहोत्रं जुहोति ॥ एवं मन्त्राणां प्रतीकमादाय विधि निषेधार्थवादनामधेयतया इति कर्त्तव्यतां प्रतिपादयन्तीति व्याख्यानरूपाणि ब्राह्मणानि सन्तीति तेषां पौरुषेयत्वं स्पष्टमेवेत्यवलोकनीयानि ब्राह्मणानि ॥ ततश्च यावद्ब्राह्मणानामपौरुषेयत्वं न सिद्ध्येत् तावन्न तेषां वेदत्वमिति दिक् ॥

अथ च युष्मत्पत्रस्य समीक्षावसरे ज्ञातमस्माभिर्भवद्भिरस्मदुक्तेः किमप्यु-

त्तरमदत्वैत्र यत्किञ्चिल्लिप्तं तत्सर्वं महामोहविद्रावणमेव तस्य प्रतिरेव । निज बुद्धिबलेन तु किमपि न तदपि व्यर्थमेव पिष्टपेषणं कृतं यतस्तस्य च महामोह विद्रावणस्याक्षरशः खण्डनमार्यसिद्धान्तनामके मासिकपत्रे भूतपूर्वमेव । तत्पत्रं सङ्गृहीत्वा तदेवालोचनीयं येन सन्तोषो भविष्यत्येव । यदि महामोहविद्रावणस्य खण्डनपत्रे यत्र सन्देहश्चेत्स एव विषयो लेख्यस्तस्योत्तरं दास्यामः । यदि वयमपि भवद्रीत्या भवदुक्तेः समीक्षां कुर्मः तदपि पिष्टपेषणं कालक्षेपश्चैव भवेत् ।तस्मादुपरम्यते भवदुक्तिसमीक्षावरेऽस्माभिः । यतो न वयं कस्यापि खण्डनमण्डनमात्रे प्रवृत्ताः किन्तु सारासारविवेकबुद्ध्या वेदविषयनिर्णयाय । अतोतः परमेतत्पत्रस्योत्तरेपि महामोहविद्रावणस्यैवोल्लेखः समायास्यति चेन्महती विडम्बना तस्मात् एतत्पत्रविषयं सुविचार्य्य विद्वच्छैलीमनुसरन्नुत्तरं देयमिति ॥

यतः——कृतस्य करणं नास्ति मृतस्य मरणं नहि ।
पिष्टस्य पेषणं नास्ति खण्डितस्य न खण्डनम् ॥
अतः——अपहाय महामोह-विद्रावणमथोत्तमम् ।
सारासारविवेकेन कुर्वतां वेदनिर्णयम् ॥
इत्यलं बुद्धिमत्स्वल्पेनैव बहुज्ञेष्विति शम् ॥

सं० १९५५
प्रथमाश्विन शु० ८
भृगौ ॥

ह० राजगुरु-
यमुनादत्त शर्म्मणः ॥
राजधानी
शाहपुरा
राजपूताना

## ॥ तृतीयं करौलीप्रत्त्रम् ॥

## ॐसच्चिदानन्दमूर्त्तये नमः ।

स्वस्तिश्रीमति शर्म्मसद्मनि बुधे पङ्क्तिर्मदीयाऽऽनते-
रार्य्याणां मदखण्डनोद्यतपरे निर्धूतपापाशये ॥
विद्याभिस्समलङ्कृते सुजमुनादत्ताभिधे प्रेषिता
कल्याणाह्वयपत्तनादतिशुभा यात्वंजसा प्रेमतः ॥ १ ॥

श्रीमत्सनातनधर्म्मप्रबोधिन्यां सभायां भवद्भिः प्रेषितं द्वितीयपत्रं समागतन्तदवलोच्य नृपकुलरत्नयादवेन्द्रश्रीमन्महाराजाय संनिवेद्य चास्माभिस्तदुत्तरबोधकं तृतीयं पत्रं संप्रेष्यते इति एतदुत्तरं सुविचार्य्य स्पष्टं प्रेषणीयमन्यथाऽनङ्गीकारास्पदं स्यात् । शमुभयत्र श्रीमदनमोहनो विस्तारयतु ॥

मि० द्वितीयाश्विन कृ० ११ बुधवासरे सं० १९५५ शुभमस्तु ॥

## पं० चन्द्रशेखरशर्म्मा भवपत्त्राभिलाषी ।

राजधानी करौली यादववाटी राजपूताना

अथ भो २ ब्राह्मणग्रन्थविद्वेषिणो धन्या यूयम् यतो भवतां प्रत्युत्तरपत्रे मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनमहर्षिसूत्रं एवमखिलशिरोधार्य्यमीमांसादर्शनद्वितीयाध्यायस्थं मंत्रभागावशिष्टे वेदैकदेशे ब्राह्मणशब्दोभिमत इत्यर्थकं शेषे ब्राह्मणशब्द इति सूत्रं एवं द्वितीया ब्राह्मणे इति व्याकरणसूत्रञ्च प्रमाणत्वेनोपन्यस्तन्तत्सर्वं भविष्ठरपहाय शाखान्तरावलम्बनं कृतन्तत्कस्य हेतोः पूर्वं भवतां प्रयासस्तु तेषां सूत्राणामर्थे एव स प्रयासोऽधुना कथं परित्यक्तः किञ्च प्रतिपित्सितमर्थं प्रतिपादयिता प्रेक्षावतामवधेयवचनो नाप्रतिपित्सितमर्थं प्रतिपादयितेति सूत्राणां प्रतिपित्सितो योर्थोऽस्माकं तं विस्मृत्याविचार्य्य च यदुत्तरितं तत्सर्वमकिञ्चित्करमित्यवधेयम्म् ।

यदुक्तं दृढतरप्रमाणमदत्वा मनसा हेतन्परिकल्प्य सोपाधिकत्वेनानैकान्ति-

कत्वेन च दूषयन्तीति तन्महदसङ्गतम् नास्माभिर्मनसा हेतवो निर्मिताः किन्त्वाप्तमहर्षिणां हेतुघटितान्येव वाक्यानि सन्तीति तेषामनुमानाकारोऽवश्यं प्रदर्शनीयः अन्यथाऽनर्थक्यप्रसङ्गस्स्यादिति तानेव च हेतून्सोपाधिकत्वेनानैकान्तिकत्वेन च दूषितप्रायाँल्लक्षयामः । दृष्टवदानुश्रविकस्सह्यविशुद्धिक्षयातिशययुक्तस्तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानादिति सांख्यकारिका हेतुत्रयघटिताऽस्ति तत्र यथाऽविशुद्धियुक्तत्वात् क्षययुक्तत्वात् अतिशययुक्तत्वाच्चेति हेतुत्रयेणानुश्रविको ज्योतिष्टोमादिर्दृष्टवत् दृष्टेन तुल्यं वर्त्तत इत्यनुमानाकारो विद्वद्भिर्मन्यते तथैव कपिलदेवमहर्षिसूत्रे शतपथब्राह्मणवचने च हेतवस्सन्तीति अनुमानाकारं प्रदर्श्यानैकान्तिकत्वेन सोपाधिकत्वेन च तान्हेतून्दूषयाम इति यत्प्रमाणे दत्तं वचनन्तद्दोषग्रस्तत्वात्त्याज्यमित्यवगन्तव्यम् ।

अत्राधीतन्यायदर्शनैर्भवद्भिरस्मदुक्तेः समीक्षां कर्त्तुमुद्यतैर्न कृता समीक्षेति भवतामेवातिपलायनं नास्माकम्म् ॥

किञ्च मन्त्रब्राह्मणयोर्वेदनामधेयम् छन्दोवत्सूत्राणीत्यनयोस्समत्वं प्रतिपादितं तदुपरि यल्लिखितमस्माभिस्तद्विस्मृतमिति भवल्लेखनतस्स्फुटं प्रतीयते न ह्यस्माकं प्रेषितपत्राशयोऽवज्ञात इति विषयान्तरावलंबनं विडंबनमात्रमेवेति सम्यगवगन्तव्यम्म् ॥

अथ यदुक्तं ब्राह्मणानां पौरुषेयत्वे वेदत्त्वे च किं मानमिति तत्रोच्यते । प्रथमन्तावदिदमवधेयम् यैर्युक्तिकलापैर्महर्षीणां प्रमाणभूतैर्वचनैश्च मन्त्रात्मकस्य वेदस्यापौरुषेयत्वं वेदत्वं च संसाध्यते । तैरेव युक्तिकलापैर्महर्षीणां प्रमाणभूतैर्वचनैश्च ब्राह्मणात्मकस्याप्यपौरुषेयत्वं वेदत्वं च स्फुटं संसाधनीयम् त्रिगुणं पठ्यते यत्र मंत्रब्राह्मणयोस्सह यजुर्वेदस्स विज्ञेयश्शेषाश्शाखान्तरास्स्मृता इति चरणव्यूहवचनेन तयोस्साम्यप्रदर्शनादिति नास्त्यत्र कश्चिद्विरोधः न च ब्राह्मणभागे जनकादीनां संवाददर्शनं न तथा मन्त्रभागे इति कथन्तयोस्साम्यमिति वाच्यम् । यजुर्वेदस्य चतुर्विंशतितमेऽध्याये उक्तास्सञ्चराप्रताः शुनासीरीया श्वेतावायव्याः श्वेताः सौर्या इति १९ मंत्रेण एवं वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलंविकान् वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिकान् हेमन्ताय ककराञ्छिशिराय विककरानिति २० मन्त्रेण च मन्त्रभागेपि पशूनां पाक्षीणां च भूयो भूयो नामोत्कीर्त्तनदर्शनात् तथा च यथा ब्राह्मणभागे जनकादीनां संवाददर्शनं तथा मन्त्रभागेपि पश्वादीनां नामोत्कीर्त्तनमिति तयो-

र्नान्योन्यं कश्चिद्विरोधः । किन्तु साम्यमेवेत्यवगन्तव्यमिति किं भवद्भिरिव बहुबुक्कणेन कृतेनेति ।

किञ्च ब्राह्मणभागस्यापौरुषेयत्वे वेदत्वे च प्रमाणान्तरमप्यस्ति तथा हि वेदप्रामाण्यनिरूपणावसरे स्थूणानिखननन्यायेन वेदानां प्रामाण्यदार्ढ्यबोधनाय गौतममहर्षिणाऽऽशङ्किता तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति अर्थात्तस्य वेदस्य प्रामाण्यं न हि भवितुमर्हतीति अनृतदोषात् व्याघातदोषात् पुनरुक्तदोषाच्चेति हेतुत्रयेण वेदानामप्रामाण्यमिति हि तस्यार्थः तत्रानृतदोषो यथा पुत्रकामः पुत्रेष्ट्या यजेतेति अर्थात्पुत्रेच्छुः पुरुषः पुत्रेष्टिङ्कुर्यादिति वेदानां परमोमतः परन्तु कृतायामपि पुत्रेष्ट्यां कुत्रचिन्न भवति पुत्रावाप्तिरिति वेदानामनृतत्वं स्फुटं प्रतीयते इति दृष्टार्थकवाक्यस्याप्रामाण्ये स्वर्गकामोऽग्निहोत्रं जुहुयादित्यदृष्टार्थकवाक्यं सुतरामप्रमाणं स्यात् सूत्रे तत्पदेन वेदपरामर्शस्तथा चानया रीत्याऽऽशङ्कां विधायाग्निहोत्रं जुहुयात्स्वर्गकाम इति ब्राह्मणग्रन्थस्यैव वचनं वेदाप्रामाण्ये दर्शितं गौतमेन परमर्षिणेति स्पष्टं प्रतीतिविषयो भवति ब्राह्मणानां वेदत्वंचा पौरुषेयत्वं चेति अन्यथा वेदानामप्रामाण्ये ब्राह्मणग्रन्थस्य वाक्यप्रदर्शनमसमंजसं स्यादिति ब्राह्मणानामपौरुषेयत्वं वेदत्वं च सिद्धमिति तद्विद्वेषिणः परास्ताः । अत एव वाक्यविभागस्य चार्थग्रहणात् बुद्ध्यर्थवादानुवादवचनविनियोगादिति सूत्रोपरि वात्स्यायनमहर्षेर्व्याख्यानं सङ्गच्छते । तत्र व्याख्यानं च त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि युक्तानि विधिवचनानि अर्थवादवचनानि अनुवादवचनानि तत्र विधिर्नियामको यद्वाक्यं विधायकं चोदकं स विधिः विधिस्तु विनियोगाऽनुज्ञा वा यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति अत्र ब्राह्मणग्रन्थवाक्यानां विभागनिरूपणावसरे अग्निहोत्रमिति वाक्यलेखनतो वात्स्यायनमहर्षिव्याख्याप्रणालिकयाऽग्निरिति ब्राह्मणवाक्यं सूत्रस्थतत्पदेन संग्रहीतुमवश्यं गौतममर्षेरभिमतमित्यनया रीत्या ब्राह्मणग्रन्थस्य वेदत्वं सर्वेषामृषिणामभिप्रेतमिति ब्राह्मणग्रन्थस्य मन्त्रात्मकभागस्य च समत्वम् । नास्त्यत्र विरोधोद्भावनं कर्त्तव्यमिति शिवशिक्षकाः ॥

किञ्च समारोपणादात्मन्यप्रतिषेध इति सूत्रस्थभाष्यतोपि ब्राह्मणानां वेदत्वं प्रतीयते तत्र हि भाष्यं प्राजापत्यामिष्टिं निरूप्य तस्यां सार्ववेदसं हुत्वाऽऽत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेदिति श्रूयते तेन विजानीमः प्रजावित्तलोकैषणयाश्च व्युत्थाय भिक्षाचर्यं चरन्तीति एषणाभ्यश्च व्युत्थितस्य पात्र-

श्रयान्तानि कर्म्माणि नोपपद्यन्ते इति नाविशेषेण कर्त्तुः प्रयोजकफलं भवतीति चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वेकाश्रम्यानुपपत्तिः तदप्रमाणमिति चेन्न प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते ते वा खल्वेते अथर्वाङ्गिरस एतादितिहासपुराणस्य प्रामाण्यमभ्यवदन् इतिहासपुराणं च पंचमं वेदानां वेद इति तस्मादयुक्तमेतदप्रामाण्यमिति अप्रमाणे च धर्म्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसङ्गः दृष्टवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति विषयव्यवस्थापनाच्च यथा विषयं प्रामाण्यं अन्यो मन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्राणामिति यज्ञो मन्त्रब्राह्मणस्य लोकवृत्तमितिहासपुराणस्य लोकव्यवहारव्यवस्थापनं धर्म्मशास्त्रस्य विषयस्तत्रैकेन सर्वव्यवस्थाप्यत इति यथाविषयमेतानि प्रमाणानि इन्द्रियादिवदिति तथाचैतद्भाष्येण मन्त्रभागस्य ब्राह्मणभागस्य चैक एव प्रवक्ता द्रष्टा चेति तयोस्साम्यत्वं पुराणादितोऽतिरिक्तत्वमवगम्यताम् ॥ एवं स यथा॰ र्द्रैन्धाग्नेरभ्याहितात्पृथग्धूमाविनिश्चरन्त्येवारेऽस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानीती शतपथब्राह्मणवचनेनेतिहासपुराणादीनामपि वेदसाम्यत्वं किं पुनर्ब्राह्मणग्रन्थस्य वेदत्वाभावसिसाधयिषया किं च स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्प्पदेवयजनविद्यामेतद्भगवोऽध्येमीति । छान्दोग्यवचनेन ब्राह्मण भागतः पुराणादीनामतिरिक्तत्वं प्रदर्शितं एवं अरेस्य महतो भूतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमसितयापतिं अयं च लोकः परश्च लोकः सर्वाणि भूतान्यस्यैवैतानि निश्वसितानीति बृहदारण्यवचनेनापि पुराणस्यातिरिक्तत्वम्बोध्यम् । अत्रापौरुषेयं वाक्यं वेदस्स च पंचविधः विधिमन्त्रनामधेयनिषेधार्थवादभेदात् तत्रोच्यते पंचविधत्वं मन्त्रात्मकस्य ब्राह्मणात्मकस्य वा उभयात्मकस्य वेति विचारे उभयात्मकस्य पंचविधत्वं प्रतिपाद्यात्रपाठो द्विविधः मन्त्रपाठो ब्राह्मणपाठश्चेति मीमांसादर्शने प्रतिपादितं वंशाद्यनुकीर्त्तनं पुराणम् उपास्यानां देवानां रहस्यकथनमुपनिषत् पूर्वच-

रितसंकीर्त्तनमितिहासः इति प्रत्येकलक्षणनिरूपितत्वेन ब्राह्मणग्रन्थतोऽतिरिक्तत्वं पुराणादीनामवधेयम् ।

यदुक्तं अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यादिमन्त्राणां प्रतीकधारणपुरस्सरं ब्राह्मणग्रन्थे व्याख्यानं कृतमिति तेषां वेदव्याख्यानत्वं प्रतीयत इति तदतीव तुच्छम् ॥ ० ॥ तथाहि शाङ्करभाष्ये शङ्कराचार्य्यैः पश्वादिभिश्चाविशेषादित्यस्य व्याख्यानं स्वेनैव कपोलकंठेन कृतन्तत्किं शाङ्करभाष्यतोऽतिरिक्तं न हि तद्रूपमेव एवं पातंजलमहाभाष्येपि अथ शब्दानुशासनमित्यस्य व्याख्यानं अथेत्ययं शब्दोऽधिकारार्थ इति तेन व्याख्येयव्याख्यानमित्येतत्समुदितं महाभाष्यं भवति तथैव यदि अग्निर्ज्योतिरित्यादिमन्त्राणां प्रतीकधारणपुरस्सरं व्याख्यानं कृतं तर्हि ब्राह्मणग्रन्थस्य वेदत्वहानिकरकं न भवेदिति तत्वविदां विमर्शः तस्माद्यदुक्तं शतपथब्राह्मणवचनेन तैत्तरीयब्राह्मणवचनेन च ब्राह्मणनां वेदतो न्यूनत्वं पुराणादिभिश्च समत्वं तत्त्वतीव खण्डनीयं किं पुनः पिष्टपेषणेनेत्युपरम्यते ॥

यच्चोदाहृतं तस्माद्यज्ञात्सर्वहुत ऋचः सामानि यज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति स वै उपनिषदि अजानिति च ताभ्यां मन्त्राभ्यां च सृष्टिक्रमप्रदर्शनपुरस्सरं ब्राह्मणभागस्य पौरुषेयत्वं साधितं तन्महदनर्थकम् तथा हि दयानन्दमतानुयायिनां मते तु ब्राह्मणे निराकारत्वेन निरवयवत्वेन च न सम्भवति सृष्टिक्रमः याजुषमन्त्रार्थस्तु परमात्मनस्सकाशादृग्वेदः सामवेदो यजुर्वेदश्च प्रादुर्भूता बभूवुः एवमेव तस्मादेवाश्वाः गावो हि जज्ञिरे तस्मादिति च मन्त्रः तस्मादेव परमात्मनो गावोऽश्वाश्च प्रादुर्भूता बभूवुरिति हि तस्यार्थस्तथा च सच्चिदानन्दविग्रहस्य परब्रह्मणो निराकारत्वेन न संभवत्ययमुत्पत्तिक्रमः न चाङ्गिरादिमहर्षीणां हृदये तेषां वेदानां प्रकाश इति वाच्यम् तत्राङ्गिरादीनामागमनमेव कस्मादिति निश्चेतव्यत्वात् न चोच्यतां स्वयमेते पादुर्भूतास्तर्हि ते एव ईश्वरा इति संभावनाया विद्यमानत्वात् ते ईश्वरेण निर्मिता इत्यपि न हि वक्तुं क्षमः ईश्वरे मनुष्याकृतिकत्वं स्यादिति अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्ण इत्य दिवचनप्रामाण्येन दयानन्देन निजनिर्मितसत्यार्थप्रकाशे १८८ पृष्ठे ब्रह्मणो निराकारत्वं प्रतिपादितं तदद्रष्टव्यम् अत एव च दयानन्दशिष्यैर्भवद्भिस्सदृशैर्मूर्त्तिपूजा निषिध्यते तस्माद्याजुषमन्त्रेण सृष्टिक्रमदर्शनपुरस्कारेण ब्राह्मणग्रन्थस्यापौरुषेयत्वं साधितं तद्वृथा बुक्कणम् । एवमग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनं दु-

दोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणमिति मनुवचनमुदाहृतन्तस्य तु यो वै ब्र-ह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रका-शं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्वेताश्वेतरवचनस्य योवाऽऽशयस्स एवे-ति बोध्यम् ॥ अपरं यानि ब्राह्मणग्रन्थानां वचनानि प्रमाणे दत्तानि तानि तु न सम्मतानि कुतः यस्य खण्डनं तस्यैव वचनानि प्रमाणभूतानि न सम्भवन्तीति सर्वं भवतां प्रलपनमेव। तस्मात्प्रजापतिरकामयत प्रजायेय भूयान्स्यामित्यादि वचनानि न प्रमाणभूतानि किन्तु ब्राह्मणग्रन्थतोतिरिक्तानि वचनान्युदाहर्त्त-व्यानीत्यवगन्तव्यम् ॥

किञ्च चरणव्यूहे——मन्त्राणां सङ्ख्याप्रदर्शनकाण्डे यजुर्वेदस्य षड-शीतिभेदाः कठाः प्राचकठाः कपिष्ठलकठाः चारायणीयाः वार्त्तन्तवीयाः श्वेताः अश्वतरा; औपमन्यवः पैंडिनेया मैत्रायणीयाश्चेत्यादयस्तेषामध्ययनं द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके ऋग्गणः परिसङ्ख्यातं ततोन्यानि यजूंषि च अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्याण्यधिकस्य पादमेतत्प्रमाणं यजु षां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं चतुर्गुणमिति यल्लिखितं तत्किं न दृष्टमिति वेदान्तर्गतो ब्राह्मणभगोपि स्पुटं प्रतीयते किं च लक्षन्तु चतुरो वे-दा लक्षं भारतमेव च लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्योतिषमिति प्रमाणेन चतुर्णामपि वेदानां प्रमाणं लक्षमिति प्रत्येकं पञ्चविंशत्यात्मकं भिद्यते तत्र ऋचां पंच सहस्राणि ऋचां पंच शतानि च ऋचामशीतिः पादश्च तत्पाराय-णमुच्यते इति ऋग्वेदस्य मानं द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके इति यजुर्वेदस्य मानं अष्टौ सामसहस्राणि सामानि च चतुर्दश ऊह्यानि सरहस्या-नीत्येतत्सामगणः स्मृत इति सामवेदस्य मानमुक्तं तेन प्रत्येकपंचविंशत्या-त्मकत्वं न पूर्यते तथा च लक्षात्मकं न संभवतीति प्रतीयते सवालखिल्यं सशु-क्रियं ब्राह्मणं चतुर्गुणमिति प्रमाणेन ब्राह्मणभागमुपनिषद्भागञ्चाश्रित्योदाहृत-प्रमाणं संघटतेऽन्यथाऽसङ्गतिस्पष्टैवेति ब्राह्मणग्रन्थानां वेदत्वं न व्यभिचर-तीति मन्त्रभाग इव ब्राह्मणभागोपि वेद इति बोध्यम्——

तस्माद्यावद्ब्राह्मणानामपौरुषेयत्वं न सिध्येत्तावन्न तेषां वेदत्वमिति भव-तां प्रतिज्ञा भग्नैव।

अथ भवतामन्तस्करणे चिरकालात्प्रविष्टो यो महामोहस्तस्य विद्रावणमे-वैतदिति सम्यग्बोध्यम् भवतां सर्वं लेखनं तु दयानन्दनिर्मितसत्यार्थप्रकाशग्र-न्थानुसारेणेति ज्ञातं परन्तु तत्खण्डनन्त्वक्षरशोऽस्माभिरन्यैश्च बहुभिः खण्डनं

कृतं किं पुनर्भूयोभूयः पिष्टपेषणेनेत्युपरम्यते एतत्पत्राशयं सम्यगवधार्य समाहितचित्तैर्भवद्भिर्निजन्टपवर्य्यसन्निधौ संनिवेद्य तदाज्ञानुसारेण प्रेषणीयम् ॥

यन्मया लिखितं किंचित्प्रमोदाय न रुष्टये ।
सर्वं क्षमापनं कार्य्यं त्वया मित्रेण सुव्रत ॥

मल्लेखनाशयप्रदर्शनपुरस्सरं ब्राह्मणग्रन्थेभ्योतिरिक्तवचनमुररीकृत्यैतत्पत्रोत्तरं प्रेषणीयम् किं बहुज्ञेषु लेखनविस्तारेणेति बोध्यम् ॥ शुभम् ॥

## निवेदको निजमाहाराजानां संमत्या पं० चन्द्रशेखरशर्म्मा राजधानी करोली—यादववाटी ।

यथा शेषे ब्राह्मणशब्दः मन्त्रब्राह्मणयोर्वेदनामधेयम् द्वितीया ब्राह्मणे त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोस्सहेत्यादीनि वचनानि साक्षाद्ब्राह्मणशब्दघटितानि अस्माभिरुपन्यस्तानि प्रमाणे तथैकमपि वचनं भवद्भिर्न दत्तमिति ज्ञायते सर्वं कपोलकल्पितमेवेति यदस्माभिः पूर्वपत्रे लिखितं तदुत्तरमद्यत्वैव मुखमस्तीति वक्तव्यं दशहस्ता हरीतकीत्यनया रीत्या मिथ्यैव प्रलपनं कृतम् उपस्थितं परित्यज्यानुपस्थितेः कल्पने न मानम् तथा च लौकिकानामाभाणकः अर्क्वेचेन्मधुविन्देतिकमर्थं पर्वतं व्रजेदिष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरे दिति ॥

---

## ॥ तृतीयं शाहपुरापत्रम् ॥

॥ ओ३म् ॥

स्वस्तिश्रीयुतचन्द्रशेखरबुधान् नत्वेति सम्प्रार्थये
पत्रं यद्भवतां तदुत्तरमयं सम्यग् विचार्य्यार्थतः ॥
श्रीमद्यादववंशभूपतिलके सद्धर्म्मसंरक्षके
ह्याशीराशिपुरस्सरं दलमदो विज्ञापयेयुर्मुदा ॥ १ ॥

अथ भवतां तृतीयपत्रस्योत्तररूपमस्माकं तृतीयपत्रम् ॥

(१) मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनसूत्रेण तु न ब्राह्मणानामपौरुषे-

गुरु विरजानन्द दण्डी
स्मृति पुस्तकालय
पु परिग्रहण क्रमांक ३२९५
दयानन्द महिला महाविद्यालय, कुरुक्षेत्र



यत्वं किन्तु तेषां वेदत्वं नास्तीति वेदसंज्ञातिदिश्यते सापि यज्ञकर्मण्येव न सर्वत्र तत्रापि न सकलस्य ब्राह्मणग्रन्थस्य किन्तु यजुर्वेदान्तर्गतब्राह्मणे ब्राह्मणमिति ब्राह्मणाख्याय इत्यध्यायद्वयस्यैव। सूत्रे मन्त्रग्रहणन्तु नियमार्थम्। अत एव "मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते। यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः॥ इति परिशिष्टोक्तिः सङ्गच्छते। अर्थात् यजुषि वसन्ताय कपिञ्जलानालभते ब्रह्मणे ब्राह्मणमालभत इत्यादीनि बहूनि कर्मप्रयोजकानि ब्राह्मणवचनानि याज्ञिकाः पठन्ति। तत्र स्वरसँस्कारयोश्छन्दसि नियमात्तेषां स्वरसंस्कारौ कर्त्तव्यौ न वेति सन्देहपरिहाराय मन्त्रब्राह्मणयोर्वेदनामधेयमिति महर्षिणा प्रतिज्ञायते। अयमेव महर्षेराशयः॥

(२) अथ च शेषे ब्राह्मणशब्द एतत्सूत्रं प्रमाणे दत्तं तेनापि न ब्राह्मणानामपौरुषेयत्वं किन्तु ब्राह्मणलक्षणमेव। यश्चैतत्सूत्रस्यार्थो भवद्भिः कल्पितः सोप्यसम्मत एव, यतः प्रथमपत्रे तु मन्त्रभागावशिष्टे मन्त्रैकदेशे ब्राह्मणशब्दो व्यवह्रियते द्वितीये तृतीये च दले मन्त्रभागावशिष्टे वेदैकदेशे ब्राह्मणशब्द इत्युक्तः अतः परं चतुर्थे छदे चान्यमेवार्थः कल्पिष्यते॥

(३) द्वितीया ब्राह्मणे-इत्यादीनि सूत्राणि भवद्भिः प्रमाणे प्रतिज्ञापितानि तत्र तु पाणिनिना मन्त्रब्राह्मणयोर्भेद एवास्तीति संहितायां ब्राह्मणे च कार्य्यान्तराभीष्टतया सूत्रे छन्दोब्राह्मणपृथक्संज्ञात्वेन विधिर्विधीयते। अत एव छन्दो ब्राह्मणानि च तद्विषयाणीति भाष्ये याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि सौलभानीत्यादिना भाष्येण तेषां पौरुषेयत्वमेव निश्चीयते।

(४) नास्माकं प्रयासः सूत्राणामर्थे, किन्तु "अपौरुषेयं वाक्यं वेदः। एतावन्मात्रे अयमेवास्माकं प्रतिपित्सितोऽर्थो भवतां यदि सूत्राणामेवार्थः प्रतिपित्सितश्चेद्द्रष्टव्यं भाष्यम्॥

(५) यदुक्तमित्यारभ्य-अवगन्तव्यमित्येतत्पर्यन्तं यत्किञ्चिल्लिप्तं तत्रोच्यते। प्रथमतस्तु आस्तिकमात्रमान्यमहर्षिकपिलदेवशतपथब्राह्मणवचनघटितशब्दान् हेतुतयोपन्यस्य तानेव हेतून् सोपाधिकत्वेनानैकान्तिकत्वेन च दूषयतां यत्प्रमाणे दत्तं वचनं तद्दोषग्रस्तत्वात्त्याज्यमित्येव कथनं भवतामयुक्तमेव। किञ्च यद्यसत्कल्पनया कपिलदेवसूत्रं शतपथब्राह्मणवचनं च प्रमाणं न स्यात् तर्हि किं भवदुक्तिरेव प्रमाणं स्यात्। अथ च कृतायामप्यसत्कल्पनायां नायं हेतुरनैकान्तिको न च सोपाधिकः। यतो वेदाभावे साध्ये वेदव्याख्यानत्वादिति हेतुर्यदि साध्यवदन्यवृत्तिश्चेत्तर्ह्यनैकान्तिको भवेन्नायं साध्यवदन्यवृत्तिः। किन्त

साध्यवद्न्यावृत्तिरेव । तद्यथा । साध्यं वेदाभवः, साध्यवान् ब्राह्मणग्रन्थः, साध्यवद्न्यः, संहिताभागस्तत्र नास्त्येव । अर्थात् संहितायां कुत्रापि व्याख्यानं नास्ति । यत्तु प्रजापते नेत्यादिचतुर्षु मन्त्रेषु भिन्नपदश्रवणमात्रेणैव भवद्भिर्वेदव्याख्यानन्तु सर्वमन्त्रे अस्तीति कथ्यते तत्तु महानेव साहसो भवतां, यत एषुमन्त्रेषु विश्वारूपाणि, विश्वाजातानि, भवसि, भवति, एषि, एति, विद्धासि, विदधाति, एतानि पदानि पाठान्तरेण पठितानीत्यतो व्याख्यानं न भवेत् । व्याख्यानन्तु दर्शितमस्माभिः पूर्वस्मिन् पत्रे अग्निर्ज्योतिरिति मन्त्रस्य ब्राह्मणरूपम् । एवं न सोपाधिकोपि यतः साध्यव्यापकत्वे सति साधनाव्यापक इत्युपाधेर्लक्षणात् संहितायां व्याख्यानत्वादिति हेतुरेव नास्ति तर्हि स्मर्यमाणकर्त्तृत्वमित्युपाधेः का कथा ।

( ६ ) अथेत्यारभ्य कृतेनेत्यन्तं यदुक्तं तत्र कथ्यते । यथा ब्राह्मणग्रन्थे जनकादीनां व्यक्तिविशेषाणामितिहासो न तथा मन्त्रभागे कुत्रापि व्यक्तिविशेषस्येतिहासो ये च भवद्भिर्दर्शिताः शब्दास्ते सर्वे जातित्वेन गृहीतास्तैश्च न पुनरितिहासः सिध्येत । अन्यत्सर्वन्तु मन्त्रब्राह्मणयोर्वेदनामधेयमित्यस्योपर्युक्तर्चा गतार्थम् ।

( ७ ) किञ्चेत्यारभ्य शिवशिक्षका इत्यन्तं यत्कथितं तत्रोच्यते । गौतमादिमहर्षयो ब्राह्मणे विचारमकार्षुरिति युक्त एव तेषां विचारः । तथा हि मुख्यो वेदस्तु मन्त्रात्मक एव तस्य च स्वतः प्रमाणत्वान्न तत्र विचारः । ब्राह्मणानि तु वेदव्याख्यानानि अतस्तेषामपि प्रमाणं वेदवदेव मान्यमित्याशयेन "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इत्यादिर्गौतमेनाप्युद्दिष्टः पूर्वपक्षः । अथ च ऋषिभिर्यत्र तत्र ब्राह्मणवचनानि श्रुतित्वेनोपन्यस्तानि, तानि तु वेदव्याख्यानतया वेदवन्माननीयत्वेन तेषां वैशिष्ट्याच्छ्रुतिपदेन व्यवहृतानि । अत एव अथ व्याकरणमित्यस्य पदस्य कः पदार्थः इत्यारभ्य यो ह्युत सूत्रं कथयेन्नादो गृह्येत इत्यन्तभाष्ये भाष्यकारेण सूत्राणामेव व्याकरणसंज्ञा सिद्धान्तिता, तथापि सूत्रव्याख्यानतया भाष्यस्यापि वैशिष्ट्यात् व्याकरणत्वेन भाष्यवचनानि व्यवह्रियन्त इति ।

( ८ ) समारोपणादात्मन्यप्रतिषेधः । इति गौतमसूत्रभाष्यं ब्राह्मणानां वेदत्वे साध्ये प्रमाणेनोपन्यस्तमिति प्रतीयते तत्तु न सम्यक् । यतो वात्स्यायनस्य विचारस्तु इतिहासपुराणस्य धर्म्मशास्त्रस्य च प्रामाण्यमप्रामाण्यं वेति विकल्पमादायैव स्पष्टं च अप्रामाण्ये धर्म्मशास्त्रस्य प्राणभृतां व्यवहार-

लोपाल्लोकोच्छेदप्रसङ्ग इति–किञ्च य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्चे-ति कथनेन ऋषीणां द्रष्टृत्वं मन्त्रभागे एव संघटते । ब्राह्मणभागे तु प्रवक्तृत्वमे-वेति । एतेनापि महर्षिवात्स्यायनेन संहिताभागस्य अपौरुषेयत्वं ब्राह्मणभागस्य च पौरुषेयत्वमेव सूचितम् । किञ्च भवद्भिरेतस्य भाष्यस्याशयो मन्त्रभागस्य ब्राह्मणभागस्य चैक एव प्रवक्ता द्रष्टा चेति तयोः साम्यमित्युक्तः तेन मन्त्र ब्राह्मणयोः पृथक्त्वमेवेति भवतामपि सम्मतमिति ज्ञायते । यतो भिन्नपदार्थस्यैव साम्यं भवति । यथा ऋगादिसंहिताभागे ऋगादिनामभेदेऽपि न केनापि साम्यं प्रतिपाद्यते । अतो भवतामप्याशयोयं श्लाघ्यः ।

( ९ ) एवमित्यारभ्य अवधेयमित्यन्तं यत्कथितं तेन तु भवद्भिः पुराणानां वेदसाम्यं ब्राह्मणभागतोतिरिक्तत्वञ्च साध्यते । तच्चं प्रकरणान्तरमप्रा-सङ्गिकञ्च ।

( १० ) तथा हि शाङ्करभाष्ये इत्यारभ्य उपरम्यत इत्यन्तं यदुक्तं तदप्या-चार्य्यशैलीमननुभूयैव । तथा हि । आचार्य्यैः प्रथमतस्तु संक्षिप्तः स्वपक्षः उद्दि-श्यते यथा भष्यकारेण स्वपक्षः अथ शब्दानुशासनमित्युपदिष्टः । पश्चादस्य विस्तरतो व्याख्या कृता । न पुनरथ शब्दानुशासनमिति प्रतीकत्वेन दर्शितः । किन्तु स्वोद्देशस्यैव संक्षिप्तोक्तिः भवतु तद्भाष्यम् । परञ्च सूत्रप्रतीकमादायैव व्याख्यानत्वेनोपन्यस्तत्वात् सूत्रात् पृथगेव । तथैव अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यादिप्रतीकमादाय व्याख्यानतयोपदिष्टानि ब्राह्मणानीति तानि मन्त्रात् पृथग्भूतान्येवेति वेदितव्यम् । तथैव शाङ्करभाष्यमिति दिक् ।

( ११ ) यच्चोदाहृतमित्यारभ्य अवगन्तव्यमित्यन्तं यल्लिखितं तत्र यस्य ख-ण्डनं तस्यैव वचनानि प्रमाणभूतानि न सम्भवन्तीति । तत्रोच्यते--अस्माभिस्तु ब्राह्मणेषु वेदत्वाभाव एव साध्यते न पुनस्तेषां प्रामाण्यमप्रामाण्यञ्चेति भवद्भि-स्तु तानि वेदत्वेनैवाङ्गीकृतानीति कथं तद्वचनप्रामाण्यं न सम्भवेदिति महदा-श्चर्य्यम् । अन्यत्सर्वं प्रकारणान्तरमप्रासङ्गिकं च ।

( १२ ) किञ्च चरणव्यूहे इत्यारभ्य बोद्धव्यमित्यन्तं यल्लिखितं तत्रोच्यते । अस्माभिर्वेदमानन्तु ऋक्सङ्ख्यया पूर्वमेव प्रेषितं तदेव युक्तम् । न साध्यते-स्माभिः पञ्चविंशत्यात्मको लक्षात्मको वा यदुक्त्वेन साधितं, तदेव युक्तं मह-र्षिसम्मतं च । अत एव शतपथब्राह्मणस्य दशमे काण्डे अथ सर्वाणि भूतानि प्रै-क्षत् स त्रय्यामेव विद्यायामित्यादिना वेदस्य सम्वत्सरप्रजापतिना साम्यं प्र-तिपादितं, तच्चैवं सम्वत्सरस्य अष्टशताधिकदशसहस्रसङ्ख्याकानि १०८००

मुहूर्त्तानि, वेदस्यापि तावन्त्येव पङ्क्तिच्छन्दयुग्मानीत्यभिधाय यथा सम्वत्सरस्य सूक्ष्मोऽवयवो मुहूर्त्तस्तथा वेदस्यापि सूक्ष्मोवयवः पङ्क्तिच्छन्दयुग्ममित्युपसंहृतम् । तदित्थम्--एकस्याहोरात्रस्य त्रिंशन्मुहूर्त्तानि संम्वत्सरदिनषष्ट्यधिकत्रिशतसङ्ख्यया ३६० गुणितानि चेत् प्रोक्तसङ्ख्याकानि भवन्ति । तथा वेदस्यापि अशीत्यक्षरप्रमाणकानि पङ्क्तिच्छन्दयुग्मानि संम्वत्सरमुहूर्त्तसङ्ख्यातुल्यसङ्ख्याकानि भवन्तीति भवति वेदस्य सम्वत्सरप्रजापतिना साम्यम् । एतावन्त्याक्षरगणनयापि यदुक्तेनोक्तं वेदमानं तदेव सिद्धम् । एतावत्सङ्ख्यात्मकः संहिताभाग एव नान्यः । एतेन यावद्ब्राह्मणानामपौरुषेयत्वं न सिध्येत्तावन्न तेषां वेदत्वमित्यस्माकमवार्य्यैव प्रतिज्ञा । किञ्च भवद्भिस्तु मन्त्रभागमारभ्येतिहासपुराणपर्य्यन्तं वेदमङ्गीकुर्वद्भिरपि लक्षन्तु चतुरो वेदा इति प्रमाणानर्हमपि वचनं प्रमाणत्वेन स्वीकृतमिति हमदाश्चर्य्यम् ॥ इतिशम् ॥

सं० १९५५ मार्गशीर्षकृष्णद्वितीयायाम् ॥ २ ॥

हस्ताक्षराणि यमुनादत्तशर्म्मणः

राजधानी--शाहपुरा--राजपूताना ॥

---

## ॥ चतुर्थं करोलीपत्त्रम् ॥

ॐ हरये नमः ।

स्वस्तिश्रीजमुनाभिधान्बुधवरान्नत्वेति संप्रार्थ्यते
सद्धर्मप्रतिपालके नृपकुलाम्भोधौ शरद्रात्रिपे ॥
मत्पत्रं मरमाशिषा सह मुदा विज्ञाप्यतामर्थत-
स्त्वत्पत्रोत्तरपत्रमेव लिखितं सम्यग् विचार्यार्थतः ॥ १ ॥

अथ यदुक्तं शेषे ब्राह्मणशब्द इति सूत्रेण ब्राह्मणानां न पौरुषेयत्वम् किं ; ब्राह्मणलक्षणमेव प्रतिपादितं मन्त्रभागावशिष्टे मन्त्रैकदेशे ब्राह्मणशब्दो व्यवह्रियत इत्यर्थोऽप्यसम्मत इति तच्च महदनर्थकम् । यतोऽखिलवेदैकशिरोमान्यपूर्वमीमांसादर्शने ३२ त्रिंशत्तमे सूत्रे मंत्रं लक्षयितुं प्राहस्माचार्यः तच्चोदकेषु

समाख्या शेषे ब्राह्मणशब्द इति च । अत्र हि शेषे ब्राह्मणशब्द इति द्वितीयसूत्रमहिम्ना मंत्रभागावशिष्टे वेदैकदेशे ब्राह्मणशब्दोऽभिमत इत्यर्थाद्वेदस्य मन्त्रात्मकत्वं ब्राह्मणात्मकं चेत्युभयं सिद्धम् । तस्माच्छेषपदेनाचार्याणां ब्राह्मणे वेदत्वमभिमत इत्यर्थे जैमिनेराचार्यस्याशयस्तस्माद्भवदुक्तं सर्वं पिष्टपेषणमेवेति ज्ञेयम् ।

( १ ) द्वितीया ब्राह्मणे छदो ब्राह्मणानि च तद्विषयाणि चतुर्थ्यर्थे बहुलं छंदसि इत्यादिसूत्राणामाशयस्तु प्रथमपत्रे प्रदर्शितः पुनरपि तदुत्थापने न किमपि दृढतरं फलं दरिदृश्यते इत्युपरम्यते । अस्माकं तु सूत्राणामेवार्थः प्रतिपित्सितः अन्यथा कोऽर्थः को वाऽऽशय इति संदेहनिवृत्तिर्न स्यात् भवतां तु संदेहनिवर्तको दयानन्दस्तच्छिष्यो वेति युष्माकं सूत्राणामर्थोऽप्रतिपित्सित इति भवद्भिर्भाष्यं कदापि न द्रष्टव्यम् ।

( २ ) तस्माद्ब्राह्मणानां न पौरुषेयत्वमित्यत्र किमपि दृढतरं प्रमाणमदत्वैव पुनस्तद्विचारकरणे भवतां प्रवृत्तिर्निष्फलैवेति भवद्भिस्साकं नास्माकं शोभते प्रतिवादः ।

( ३ ) अथ च मंत्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनसूत्रेण ब्राह्मणग्रंथानां नापौरुषेयत्वं किं तु तेषां वेदत्वं नास्तीति यज्ञकर्मणि वेदसंज्ञातिदिश्यत इति भवद्भिर्निरूपितन्तच्च मुधैव यतः पूर्वं प्रथमपत्रे छंदोवत्सूत्राणीत्यतिदेशशास्त्रेण सह साम्यं प्रदर्श्य ब्राह्मणानां न साक्षाद्वेदत्वं किन्तु वेदतुल्यत्वमिति बहुविस्तरेण लिखितं तस्य मया गुरुवद्गुरुपुत्रेषु मन्तव्य इत्यत्र भाष्यकारेणोक्तं यथा गुरोस्स्थाने शिष्यो याज्यकुलानि गत्वाग्रासादीनि लभत इति लोकदृष्टान्तद्वारा वद्घटितत्वमतिदेशत्वमित्यतिदेशसामान्यलक्षणेन खंडनं कृतमिति पुनरपि तदेव लिखितमिति वृथा बुक्कणमेव भवतां किं च मंत्रग्रहणं नियमार्थमित्युक्तन्तदपि न मनोरमं तथा हि अधिकमधिकार्थमिति न्यायेन ब्राह्मणविशेषपरिग्रहार्थं पृथग् ब्राह्मणग्रहणं छंदो ब्राह्मणानि च तद्विषयाणीति सूत्रे । तस्मात्सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कल्प्यते इति केनापि मंत्रात्मकस्य वेदत्वं न सिध्यतीति मंत्रग्रहणं विध्यर्थमेवेति याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्य इति वार्तिकं संगच्छत इति भवदुक्तमखिलं कपोलकल्पितमेवेति पूर्वलिखितपत्रे दृष्टव्यम् ।

( ४ ) किं च प्रज्ञानं ब्रह्म अहं ब्रह्मास्मि तत्त्वमसि अयमात्मा ब्रह्म इत्यादिमहावाक्यानि ब्राह्मणग्रंथानां सर्वैरपि नैयायिकैर्मीमांसकैश्च शिरोभिरवधा-

र्यंते तस्मात् ग्रंथघटितवाक्यानि निरर्थकानीति शंकानिवृत्तये ब्राह्मणग्रंथानाम-
प्यपौरुषेयत्वं वेदत्वं साधनीयमन्यथा पूर्वोक्तवाक्यानामानर्थक्यप्रसंगस्स्यादिति
मंत्रभागवद् ब्राह्मणभागस्यापि वेदत्वमित्येवाखिलमहर्षीणां तात्पर्यं निश्चेतव्य-
म् । किं च सांख्यशास्त्रनिर्मातृणा परमर्षिणा कपिलदेवेनापि प्रतिपादितं आ-
नुश्रविकोपि कर्मकलापः दृष्टवत् दृष्टेन तुल्यं तत्रानुश्रविकपदस्यार्थः गुरुमुखा-
दनुश्रूयत इत्यनुश्रवो वेदः एतदुक्तं भवति श्रूयत एव न परं केनचित् क्रियते
तत्र भव आनुश्रविक इति तथा च कर्मकलापो ब्राह्मणग्रंथस्य विषयो न तु मं-
त्रभागस्येति ब्राह्मणग्रंथस्य स्पष्टं वेदत्वं प्रतीयते इति परमदृष्टिपातेन विचा-
रणीयं किं बहु पिष्टपेषणेन किं च आस्तिकमात्रमान्यमहर्षिकपिलदेवशतपथ-
ब्राह्मणवचनघटितशब्दान् हेतुतयोपन्यस्यानुमानाकारं प्रदर्श्य तद्वचनमप्रामाण्य
त्वेन हेयमित्युक्तमस्माभिस्तत्राक्षेपो भवतां यद्यसत्कल्पनया कपिलदेवसूत्रं प्रमा
णं न स्यात्तर्हि भवदुक्तिरेव प्रमाणं स्यादिति तत्तु महत्तुच्छं यतो दोषग्रस्तं व-
चनं केषामपि प्रमाणपदमारूढुमसमंजसमिति मदुक्तेः प्रमाणत्वे न कोपि विरो-
ध इति मदीयकल्पनमसंगतं भवतां तु संगतमिति महदाश्चर्यम् । किं च कुतो-
ऽप्यसत्कल्पने नायं हेतुरनैकांतिकस्सोपाधिकश्च यतो वेदाभावे साध्ये वेदव्या-
ख्यानत्वादिति हेतुर्यदि साध्यवदन्यवृत्तिश्चेत्तर्ह्यनैकांतिको भवेदित्युदीरितं भ-
वद्भिस्तदपि न रम्यं तथा हि साध्यवदन्यवृत्तिरनैकांतिकत्वमिति लक्षणमपि
दूषितप्रायं तथा हि साधारणासाधारणानुपसंहारिभेदेनानैकांतिकत्वं त्रिधा भि-
द्यते तत्र साध्यवदन्यवृत्तिः साधारणः तेन च व्याप्तिज्ञानं प्रतिवध्यते साध्या-
सामानाधिकरणोऽसाधारणस्तेन च साध्यसामानाधिकरण्यज्ञानं प्रतिबध्यते त-
द्यथा शब्दो नित्यः शब्दत्वादित्यादावसाधारण्यं शब्दोऽनित्यः शब्दत्वादित्या-
दौ साधारण्यं तथा च वेदव्याख्यानत्वादितिहेतौ साधारणस्य साध्यवदन्य-
वृत्तित्वस्याभावेपि साध्यासामानाधिकरण्यस्य विद्यमानत्वाद् भवति वेदव्या-
ख्यानत्वादितिहेतुरनैकांतिकदोषग्रस्त इति पूर्वोक्तहेतुर्ब्राह्मणग्रंथानां वेदत्वाभा-
वे न साधक इति भवद्भिर्यल्लिखितं तत्र वृथा कालक्षेप इत्यपूर्वलेखनतोऽस्माकं
संतोषोन्यथाऽखिलं लेखनं भवतामकिंचित्करमेवेति वोध्यम् ।

(५)किं च संहिताभागेऽपि साध्यवदन्यवृत्तित्वं वर्त.र्ति तथा हि साध्यं वेदाभा
वःसाध्यवान् संहिताभागस्तत्र प्रजापते नत्वादिचतुर्ष्वपि मंत्रेषु विश्वाजातानीत्या
दिविलक्षणपदघटितेषु व्याख्यानमस्त्येवान्यथा विलक्षणपदोपादानमसमंजसमि-
ति ब्राह्मणभाग इव संहिताभागः संहिताभागवद्ब्राह्मणभाग इति स्फुटं प्रतीयते

ब्राह्मणग्रन्थानां पौरुषेयत्वं वेदत्वं चेति यदुक्तं भवद्भिर्विश्वारूपाणि विद्वाजातानि भवासि भवतीत्यादिपदानि पाठान्तरेण पठितानीत्यतो व्याख्यानं न भवेदिति स्पष्टतया पूर्वं प्रथमपत्रे निवेदितं ततस्संतोषः कर्तव्य इति किं बहुविस्तरेणेति शेयम्

(६) अथेत्यारभ्य कृतेनेत्यन्तं प्रति यदुक्तं भवद्भिस्तत्रोच्यते।ब्राह्मणग्रंथे जनकादिव्यक्तिविशेषाणां संवाददर्शनेन यथेतिहासो न तथा मन्त्रभागे कुत्रापि व्यक्तिविशेषस्येति भवतामाशयं प्रदर्शयन् हिरण्यगर्भः समवर्तताग्रे०अहं मनुरभवं सूर्यश्चाहं कक्षीवान्कृषिरस्मि विप्रः अहं कुत्सनार्जुनेयं नृञ्जेहं कविरुशना पश्यतामा इत्यादिसंहिताभागेऽपीतिहासदर्शनतः मन्त्रभागस्याप्यैतिहासिकत्वं सिद्धम् । अत एव न्यायदर्शनस्य द्वितीयाध्याये १ प्रथमान्हिके विधिविहितस्यानुवचनमनुवाद इति सूत्रे एवमन्यदुत्प्रेक्षणीयमित्यन्तभाष्येण ब्राह्मणसंज्ञकवैदिक वाक्यानामुदाहरणं प्रदर्शयन् वात्स्यायनपरमर्षिणा लिखितं यथा लौकिके वाक्ये विभागेनार्थग्रहणात्प्रमाणत्वमेवं वेदवाक्यानामपि विभागेनार्थग्रहणात्प्रमाणत्वं भवितुमर्हतीति।यथा च ब्राह्मणानि वेदाः अपौरुषेयवाक्यत्वात् सहस्रशीर्षेत्यादिवाक्यवदित्यनुमानेन संहिताभागेऽपि च वेदत्वं सर्वर्षिभिः प्रतिपादितमिति भवदुक्तमखिलमनर्हमेवेति बोध्यम् ।

(७) अथ यदुक्तं भवद्भिर्मुख्यो वेदो मन्त्रात्मक एव तस्यैव स्वतः प्रमाणं ब्राह्मणानि तु वेदव्याख्यानानि अतस्तेषामपि प्रमाणम् वेदवदेव मान्यमित्याशयेन तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति गौतमेनोपदिष्टः पूर्वपक्ष इति तत्र निगद्यते यदि वेदवत्तर्हि समागतं वेदतुल्यत्वं यथा पाणिनिना स्थानिवत्सूत्रेणादेशे स्थानिवृत्तिधर्मारोप्यते तथा ब्राह्मणभागेऽपि संहितावृत्तिर्यो वेदत्वमपौरुषेयत्वरूपो धर्मस्तं लभत इति प्रसिद्धोऽस्माकं पन्थाः तस्माद्वेदनिगमादिपदेन ब्राह्मणानामपि गौतमादिभिरपौरुषेयत्वं सिद्धान्तितमित्यस्माकमेव पन्थाः भवद्भिः परमानुकंपया प्रदर्शितस्तस्माद्भवतां प्रतिज्ञा भग्नैवेति बोध्यम्

(८) किं च समारोपणादात्मन्यप्रतिषेध इति सूत्रे अप्रमाण्ये धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसंग इति किं च य एव मंत्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्चेति भाष्येण द्वयोरपि समत्वमस्माभिर्निरूपितं तत्र भवद्भिर्मन्त्रभागे एव द्रष्टृत्वं संघटते न तु ब्राह्मणभागे तत्र तु प्रवक्तृत्वमेवेति प्रतिपादितमिति भाष्याशयः कस्मादायाति न हि पूर्वोक्तसूत्रस्थभाष्यस्याशयोऽयं किं तु मंत्रभागे ब्राह्मणभागे चेत्युभयत्रापि द्रष्टृत्वं प्रवक्तृत्वं चेति भाष्यविदां परामर्शः तस्माद्ब्राह्मणभागेऽपि वेदत्वमपौरुषेयत्वमिति वे-

द्त्वसिषाधयिषयास्माकं प्रवृत्तिर्नितरां प्रतिभाति तस्माद् भवदुक्तमखिलं निरर्थकमप्रासंगिकं च किं च पूर्वपत्रे पुराणानामपि वेदतुल्यत्वं ब्राह्मणतोऽतिरिक्तत्वं च साधितं तत्कथमप्रकरणान्तरमप्रासंगिकं चेति स्फुटं प्रदर्शनीयं तथा हि शाङ्करभाष्ये इत्यारभ्य उपरम्यत इत्यन्तं प्रति भवद्भिरुक्तं आचार्यैः प्रथमं संक्षिप्तः स्वपक्ष उद्दिश्यते यथा भाष्यकारेण स्वपक्षः अथ शब्दानुशासनमित्युपदिष्टः पश्चादस्य विस्तरेण व्याख्यानं कृतं न पुनरथ शब्दानुशासनमिति प्रतीकत्वेन दर्शित इति तत्तु निरर्थकमेव तथा हि अथ शब्दानुशासनमित्युक्त्वा अथेत्ययं शब्दोधिकारार्थ इति प्रतीकधारणपुरस्सरं विस्तरतो व्याख्या कृता तथा पश्वादिभिश्चाविशेषादिति सूत्रस्य व्याख्या स्वयं शंकराचार्यैः कृतेति अग्निर्ज्योतिरिति प्रतीकमादाय ब्राह्मणग्रंथे यदि व्याख्या कृता तर्हि का वो हानिः अत एव गौतमेन द्वितीयाध्याये वाक्यविभागस्य चार्थग्रहणात् सिद्ध्यर्थवादानुवादवचनविनियोगादिति सूत्रं निर्मितम् तदाशयस्तु भाष्यतो द्रष्टव्यमिति ब्राह्मणानामपौरुषेयत्वं सिद्धं ।

(९) किं च यस्य खंडनं तस्यैव वचनानि न प्रमाणभूतानि संभवंतीत्यत्र निरुक्तं नास्माकं ब्राह्मणग्रंथानां प्रामाण्यमप्रामाण्यं वेत्यत्र प्रवृत्तिः किंतु तेषु वेदत्वाभावे प्रवृत्तिरिति शतपथब्राह्मणवचनं प्रमाणत्वेनोपन्यस्तं चेत् का क्षतिरिति तत्रोच्यते केष्वपि ग्रंथेषु खण्डितप्रायेषु तद्ग्रथितवचनस्य प्रामाण्यं न इति दृश्यत इत्याचार्याणां शैलीमनुलंघ्य यत्० किञ्चिल्लिखितं तत्सर्वं मिथ्यैव तथा हि यदि प्रामाण्याप्रामाण्यस्यैव नास्ति निश्चयस्तर्हि कथं शतपथब्राह्मणस्य भूयोभूयो वचनप्रामाण्यपुरःसरं वेदत्वाभावसाधने प्रवर्तते भवन्त इति निश्चीयतेऽस्माभिर्यस्य खंडनं-तस्य प्रामाण्यमकिंचित्करमिति अत एव लौकिकदृष्टान्तो यत्र भोजनं तस्यैव भेदनमसंगतमिति संगच्छते तस्माद् ब्राह्मणग्रंथस्य वेदत्वाभावे शतपथब्राह्मणवचनं प्रमाणत्वे नार्हमिति भवदुक्तं सर्वं निरर्थकमित्यवगंतव्यम् ।

(१०) यद्वेदसंख्या भवद्भिर्बहुविस्तरेण साधिता सापि प्रकरणान्तराभिधायिका निष्फला च तथा हि चरणव्यूह ऋचां दश सहस्राणीत्यादिना प्रतिपादिता संख्या सम्यक् । परं तु चतुर्णामपि लक्षात्मकत्वं शास्त्रान्तरतः वेदभाष्यतश्च निश्चितमस्ति नास्त्यत्र संदेहः यद्यपि प्रत्येकं संहिताभागः संख्ययाभिद्यते तथापि सर्वात्मना लक्षात्मकत्वमेव । किं च भवद्भिः शतपथब्राह्मणस्य दशमकांडस्थाथसर्वाणि भूतानि प्रैक्षत् स त्रय्यामेव विद्यायामित्यादिना वेदस्य

संवत्सरस्य संख्यया साम्यं साध्यते इत्युक्तं तत्सर्वं विषयान्तरं निरर्थकं चेति भाष्य दृष्ट्वा मौनमास्तव्यमिति किं मिथ्या प्रलापेनेति यावद् ब्राह्मणानां वेदत्वाभावे दृढतरप्रमाणं न स्यात्तावच्छहस्रपत्रलेखनेन किं यद्यस्ति शास्त्रार्थे श्रद्धा तर्हिपूर्वं व्याख्यानं देयं येन भवतां पांडित्यं प्रकटी भूयात् अन्यथा भूयोभूयः पिष्टपेषणे न किमपि फलमिति याथार्थलेखनीयमन्यथा सदा हेयं ज्ञात्वा पत्रोत्तरदाने निष्फलमिति शम् ।

पं० चंद्रशेखरशर्म्मा यादवेंद्रमहाराजाज्ञानुवर्ती

सं० १९५५ राजधानी कल्याणपुरी, राजपूताना पौषकृष्णद्वादश्याम् ॥

---

## ॥ चतुर्थं शाहपुरापत्रम् ॥

॥ ओ३म् ॥

नतिमादाय मे पत्रं कोविदश्चन्द्रशेखरः
निवेदयेत् करौलीश-यादवाधीशसन्निधौ ॥ १ ॥

यद्यपि दत्तोत्तराणामेव पुनरुपादानादनुत्तरार्हमेव भवत्पत्रं तथापि भवतां दृढतरप्रबोधाय पुनस्तान्येवोत्तराणि प्रदृश्यन्ते ॥

अथ भवतां चतुर्थपत्रस्योत्तररूपमस्माकं चतुर्थपत्रम् ॥

(१)अथ यदुक्तमित्यारभ्य ज्ञेयमित्यन्तं यल्लिखितं तत्रोच्यते । ' शेषे ब्राह्मणशब्द इति सूत्रेण तु न ब्राह्मणानामपौरुषेयत्वं किन्तु ब्राह्मणलक्षणमेव । अत एव शेषलक्षणावसरे शेषः परार्थत्वादिति सूत्रेण ब्राह्मणं वेदात्पृथगेव सूचितं जैमिनिना, स्पष्टं चैतत्सूत्रस्य शावरभाष्ये-" यः परस्योपकारे वर्तते स शेष इत्युच्यते।तद्यथा येपारार्थास्ते वक्तारो भवन्ति शेषभूता वयमिहेति इति भाष्येण। किञ्च ये परार्थास्ते वक्तार इति कथनेन ब्राह्मणानां वक्तृत्वेन वेदव्याख्यानत्वं स्पष्टमेव । तस्मात् शेषे ब्राह्मणशब्द इत्यस्य मन्त्रभागावशिष्टे मंत्रैकदेशे ब्राह्मणशब्दो व्यवह्रियत इत्याश्चर्यजनकोर्थो भवद्भिरेव कल्पितो नाचार्यैः ॥

( २ ) द्वितीया ब्राह्मणे इत्यारभ्य प्रतिवाद इत्यन्तं यल्लिप्तं, तत्र पाणिनिसूत्राणामुत्तरं तु पूर्वमेव प्रेषितमस्माभिः । अन्यत्सर्वं च स्वप्नप्रलपनमेव, तेन चा-

पसिद्धान्तेन " सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसंगोपसिद्धान्तः ,, इति न्याय-सूत्रात् अपसिद्धान्तो निग्रहस्थानं भवताम् ॥

( ३ ) अथ चेत्यारभ्य द्रष्टव्यमित्यन्तं यल्लिखितं तत्रोच्यते। मन्त्रब्राह्मणयोर्वेदनामधेयमित्यस्योपरि यदुक्तमस्माभिस्तदेव सम्यग् भाष्यसम्मतं च। तत्राति देशविषये वद्घटितत्वमतिदेशत्वमिति कथनं तु भवतां भाष्यमजानतामेव। तथा हि बहुगणवतुडतिसंख्येति सूत्रभाष्ये अथवा नेदं संज्ञाकरणं तद्वदतिदेशोयमित्यारभ्य संख्यावादिति गम्यत इत्यन्तभाष्येण भाष्यकृता विनापि वतिनातिदेशः स्वीकृतः। तथैव स्थानिवदादेशोऽनल्विधाविति सूत्रेऽपि वत्करणं किमर्थमिति भाष्यकृता त्वाशङ्कितं, तत्प्रदीपे च विनापि वतिना तदर्थलाभो यथा ङित्किदित्यारभ्य विनापि वतिनातिदेशपक्ष उपन्यस्त इत्यन्तकैयटेन स एव स्पष्टीकृतः स्पष्टतरं चैतत्सर्वं गाङ्कुटादिभ्योऽञ्णिन्ङिदित्यतिदेशसूत्रस्थभाष्यकैयटयोः ।

यच्चोक्तं न केनापि मन्त्रात्मकस्य वेदत्वं साधितमिति मन्त्रग्रहणं विध्यर्थमेवेति तदपि प्रतिज्ञासूत्रभाष्यमनालोच्यैव। तथा हि वेद्यन्ते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या, अपौरुषेयं वाक्यं वेद इति सिद्धान्तेन च ज्ञानसाधनभूतः प्रसिद्धो मन्त्रात्मको वेद इति मनस्यादाय, भाष्ये मन्त्रेण स्मृतं कर्म कर्त्तव्यमिति नियमार्थवचनमिति वाक्येन स्पष्टमुक्तं भाष्यकृता। एवं च सूत्रे मन्त्रग्रहणं तु नियमार्थं ब्राह्मणानां च वेदत्वं नास्तीति तेषां वेदसंज्ञातिदिश्यते। न पुनस्तेषामपौरुषेयत्वमिति पूर्वमेवोक्तमस्माभिः ॥

( ४ ) किञ्च प्रज्ञानं ब्रह्मेत्यारभ्य पिष्टपेषणेनेत्यन्तं यल्लिप्तं तदपि दत्तोत्तरमेव। तथा हि ऋषिभिर्यत्र तत्र ब्राह्मणवचनानि श्रुतित्वेनोपन्यस्तानि तानि तु वेदव्याख्यानतया वेदवन्माननीयत्वेन तेषां वैशिष्ट्याच्छ्रुतिपदेन व्यवहृतानीति व्याकरणदृष्टान्तेन स्पष्टं प्रतिपादितमस्माभिस्तस्य चानुत्तरत्वेन, उत्तरस्याप्रतिपत्तिरप्रतिभा इति न्यायसूत्रात् अप्रतिभा निग्रहस्थानम् ।

( ५ ) किञ्चेत्यारभ्य ज्ञेयमित्यन्तं यल्लिखितं तदपि दत्तोत्तरमेव। तथा हि संहिताभागे न कुत्रापि व्याख्यानं प्रजापते नेत्यादिचतुर्षु मन्त्रेषु विश्वारूपाणीत्यादिपदानि तु अर्थान्तरप्रयोजनाय पाठान्तरेणैव पठितानि न पुनर्विश्वारूपाणीत्यस्य विश्वाजातानि, भवतीत्यस्य भवसि, एतीत्यस्य एषि, विदधातीत्यस्य विदधासि, व्याख्यानम्भवितुमर्हति। व्याख्यानन्तु कस्यापि प्रतीकमादाय पदपदार्थविग्रहवाक्ययोजनादिभिर्भवति। तच्च दर्शितमस्माभिरग्निर्ज्योतिरिति मन्त्रस्य ब्राह्मणरूपम्। एतेन व्याख्यानत्वादिति हेतुर्नैकान्तिकोपि। तद्यथा

यस्सपक्षे विपक्षे च भवेत् साधारणस्तु सः । इत्यनेन विपक्षे संहितायां तद्भावाच्च साधारणः।यस्तूभयस्मात् व्यावृत्तः सत्वसाधारणो मतः । इत्यनेन सपक्षेऽब्राह्मणग्रंथे सद्भवान्नासाधारणोपि।किञ्च ब्राह्मणग्रन्थे व्याख्यानदोषमनुद्धृत्य संहिताभागे तत्कथनेन " स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ' इति सूत्रात् मतानुज्ञा निग्रहस्थानम् ॥

( ६ )अथेत्यारभ्य बोध्यमित्यन्तं यल्लिखितं तत्र हिरण्यगर्भादीनामर्थमननुभूय तेषां नामोत्कीर्तनेनैव संहितायामितिहासः कल्प्यते । पूर्वन्तु इतिहासकल्पने पशुपक्षीणां नामोत्कीर्तनं दर्शितम् अधुना च हिरण्यगर्भादीनामिति हेत्वन्तरेण ' अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तर , मिति सूत्रात् हेत्वन्तरनिग्रहस्थानम् । किञ्च स्वपक्षे इतिहासदोषमनुधृत्य संहिताभागे तत्प्रसंगेन मतानुज्ञापि । अथ ब्राह्मणानि वेदाः अपौरुषेयवाक्यत्वादित्यनुमानमपि भवतां जलं वन्हिर्धूमत्वादितिवत् । यतो ब्राह्मणानामपौरुषेयवाक्यत्वमेव नास्तीति स्वरूपासिद्धहेत्वाभासो निग्रहस्थानम् ।

( ७ ) अथ यदुक्तमित्यारभ्य बोध्यमित्यन्तं यल्लिखं तदुत्तरे ब्राह्मणानामपि प्रमाणं वेदवदेव मान्यमिति कथनेनैव न ब्राह्मणानि वेदा भवन्ति । यथा सिंहो माणवक इत्युक्तौ माणवकः सिंहो न भवति किन्तु सिंहात् भिन्न एव यतो भिन्नेष्वेव साम्यमतिदेशो वा इत्यभिहितस्याप्यविज्ञानेन 'अविज्ञातं चाज्ञान, मिति सूत्रेण अज्ञानं निग्रहस्थानम् ।

( ८ ) किञ्चेत्यारभ्य सिद्धमित्यन्तं यल्लिखितं तदुत्तरे यदुक्तमस्माभिः ऋषीणां द्रष्टृत्वं मन्त्रभागे एव संघटते ब्राह्मणग्रन्थे तु प्रवक्तृत्वमेवेति तदेव सम्यक् । यतो मन्त्रभागस्यापौरुषेयत्वात् प्रवक्तृत्वाभावः,ब्राह्मणग्रन्थे च पूर्वोक्त चतुर्वेदविद्भिरित्यादिशतपथब्राह्मणवचनेन प्रवक्तृत्वमेवेति । तस्मात्स एव भाष्याशयस्तं च निरर्थकमप्रासाङ्गिकं चेति भवतां कथनमाश्चर्यमेव । अथ मन्त्रभागस्यैवापौरुषेयत्वे साध्ये पुराणानां वेदसाम्यसाधनं भवतां स्फुटमेव प्रकरणान्तरम्।यच्चोक्तमथशब्दानुशासनमित्यस्य अथेत्ययमिति प्रतीकमादाय स्वेनैव व्याख्या कृता तथा यदि मन्त्रभागस्य व्याख्यानं ब्राह्मणं भवेत्तर्हि का वो हानिरिति, तत्तु न सम्यक् । तथा हि । यथा शब्दानुशासनमित्यस्य अथेत्ययमिति प्रतीकस्य चैक एव पतञ्जलिर्वक्ता न तथा मन्त्रब्राह्मणयोः । तत्र मन्त्रस्य तु न कोपि वक्ता ब्राह्मणग्रन्थस्य च महर्षिवक्तृत्वात् । तथैव शाङ्करभाष्यमपि किञ्चैतन्निदर्शनेन तु ब्राह्मणानि व्याख्यानतयाङ्गीकुर्वतां ' प्रतिदृष्टान्तधर्माभ्यनुज्ञा

स्वदृष्टान्ते प्रतिज्ञाहानिः, रिति सूत्रात् प्रतिज्ञाहानिर्निग्रहस्थानं भवताम् ॥

( ९ ) किञ्चेत्यारभ्य अवगन्तव्यमित्यन्तं यल्लिखितं तदुत्तरे नास्माभिर्ब्राह्मणानां खण्डनं क्रियते, किन्तु तेषु वेदत्वाभाव एव साध्यते।भवन्तस्तु पुनस्तानि वेदत्वेनैवाङ्गीकुर्वन्तोपि तेषां वचनं प्रमाणत्वेन नाङ्गीकुर्वन्तीति महाश्चर्यमिति पूर्वमेवोक्तमस्माभिः ॥

( १० ) यद्वेदसङ्ख्येत्यारभ्य शमित्यन्तं प्रत्युच्यते। अपौरुषेय वाक्यं वेदः । स च कियानिति निश्चयाय शतपथब्राह्मणस्य दशमकांडस्थप्रमाणेनास्माभिः साधितां वेदसंख्यां भवन्तः प्रकरणान्तरं निरर्थकं च कथयन्तीति महदाश्चर्यम् । भवद्भिश्चैतावत्पर्यन्तं न केनापि प्रमाणेन साधितो लक्षात्मको वेदो नो वा ब्राह्मणानामपौरुषेयत्वं साधितमिति ' उत्तरस्याप्रतिपत्तिरप्रतिभेति सूत्रात् अप्रतिभा निग्रहस्थानं भवताम् ॥

दुष्टशब्दप्रयोगेण लङ्घनात्समयावधेः ।
पुनश्च निग्रहस्थानैर्याता यूयं परास्तताम् ॥ १ ॥

इति शम वै० कृ० ४ गुरौ । सं० १९५५ । } ह०राजगुरु--यमुनादत्त--षट्शास्त्रिणः । राजधानी–शाहपुरा । राजपताना ।

---

# ॥ पञ्चमं करौलीपत्रम् ॥

## श्रीमदनमोहनो विजयतेतराम् ।

जगतो यदुपादानं सच्चिदानंदविग्रहम् ॥
तन्नमस्कृत्य वेदानां मूलतत्वं विविच्यते ॥ १ ॥
नतिर्मदीया यमुनाभिधे बुधे शुभाशिषश्शाहपुरेशसन्निधौ ॥
दलं तुरीयं भवता यदीरितं तदुत्तरार्हं परिप्रेषितं मया ॥ २ ॥
श्रीमद्धर्मप्रबोधिन्यां सभायां पत्रमागतं ।
तद्विलोक्य करौलीशान्तपररत्नांतिकेर्पितम् ॥ ३ ॥

यद्यप्यनुत्तरार्हं वः पत्रं दुष्टप्रयोगतः ।

तथाप्युल्लिख्यतेस्माभिः भवतां बोधसिद्धये ॥ ४ ॥

अथेदं पंचमपत्रं भवतां चतुर्थपत्रखंडनपरमस्माकं तच्च निजन्दपसंन्निधौ निवेदयन्तु भवन्तः ॥

शमुभयत्र मदनमोहनो वितनोतु अथास्तु विदितमेतद्दयानन्दमतावलम्बिनां विदुषां अद्यावधिप्रथितमुत्तरार्हमनुत्तरार्हं यद्यत्पत्रम्प्रेषितं तदखिलमप्यङ्गीकृतम् । परन्त्वद्य यदि सम्यग् विचार्य्योत्तरार्हं पत्रमागमिष्यति भवतां तदोत्तरप्रेषणं भवेदन्यथाऽनङ्गीकृतंस्यादित्यवश्यमवधारणीयम् । शुभमस्तु ।

ह० महाराजाज्ञावशम्वदस्य व्याकरणाचार्य्य पं० चन्द्रशेखरशर्म्मणः ।

राजधानी--करौली--राजपूताना ।

( १ ) अथ-अज्ञानतिमिरान्धैरनाभिलक्षितवेदसंप्रदायैर्भवद्भिः पूर्वमिदमवधार्य्यताम् सर्वत्र वाक्यार्थबोधं प्रति पदार्थज्ञानस्य हेतुत्वं प्रतिपादितं तथा च पूर्वं वेदलक्षणमवश्यं वक्तव्यमिति तल्लक्षणं प्रतिपादयन्नुच्यते । तथा हि वेदत्वं च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं न तु केवलमपौरुषेयत्वमात्रं अन्यथा पशुखगाद्युच्चरितवाक्यानामप्यपौरुषेयत्वात्स्याद्वेदत्वमिति भवदुक्तवेदलक्षणं दूषितप्रायमिति तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्द, इति च सूत्रद्वयं प्रतिपाद्यान्तिमस्य मन्त्रभागावशिष्टे मन्त्रैकदेशे ब्राह्मणशब्द इत्यर्थं लक्षणव्यपदेशेन कथयन्ति शबरस्वामिन इति वेदस्य मन्त्रात्मकत्वं ब्राह्मणात्मकत्वं चेति प्रभेदद्वयवत्वं सिद्धं कथमन्यथा संलगति शेषे ब्राह्मणशब्द इति तेन स्फुटं ब्राह्मणग्रन्थानामपि मन्त्रभागवदपौरुषेयत्वं वेदत्वं च किं च शेषः परार्थत्वादिति सूत्रार्थोयमाचार्य्याणामभिमतस्तथा हि शेषपदवाच्यो ब्राह्मणभागो वेदः परार्थत्वात् तदर्थश्च परस्मै परमानेऽर्थः प्रयोजनं यस्येति परार्थस्तस्य भावस्तत्वन्तस्मादित्यर्थः यद्यत्परार्थत्वं तत्तद्वेदजन्यतात्पर्यग्राहकमिति व्याप्तेः दृष्टञ्चैतत् व्यक्ताव्यक्तपरार्थसाधके साङ्ख्यशास्त्रे तथा च भवतामनुमित्सितोर्थस्तद्विपरीतस्य सिद्धेरिष्टविघातकृदिति शेषे ब्राह्मणशब्द, इति सूत्रेण ब्राह्मणग्रन्थानामपौरुषेयत्वं नाचार्य्यैस्साधितं किन्तु केवलं तल्लक्षणमेव अत एव शेषः परार्थत्वादिति सूत्रेण वेदात्पृथगेव ब्राह्मणं सूचितं जैमनिनेति भवदुक्तं सर्वम-

सङ्गतं विष्टवेषणञ्च किञ्च यः परस्योपकारे वर्त्तते सश्शेष इत्युक्त्या ये पदार्थास्ते वक्तारो भवन्तीति भवदुक्तङ्गगनपुष्पायमाणं तस्मान्नास्माभिर्निजयुक्त्या शेषे ब्राह्मणशब्द इत्यस्यार्थः कल्पित इति सूक्ष्मदृष्ट्यावलोकनीयम् । किञ्च ब्राह्मणानामप्यपौरुषेयत्वं शिष्टाचारविषयत्वाल्लोकोपकारककर्म्मकाण्डविषयत्वाच्चेति हेतुद्वयं वरिवर्त्ति तेन चापौरुषेयत्वं संसाध्यते न हि दयानन्दसंप्रदायभाजं भवादृशं नूतनाचार्य्यमन्तरा कोऽपि परमर्षयो विदितवेदसंप्रदायविषया ब्राह्मणभागरहिते मन्त्रात्मकेऽनपौरुषेयत्वमवेदत्वञ्च साधितवन्तस्तथा चानादितात्पर्य्यावधारणपरमहरहस्संध्यामुपासीत स्वर्गकामाऽग्निहोत्रं जुहुयात् नित्यं ब्राह्मणो मद्यं वर्जयेत् ऋतौ भार्य्यामुपेयादित्यादि विधिनिषेधबोधकं वाक्यं सङ्गच्छते । अन्यथा ब्राह्मणग्रन्थानामवेदत्वे सुतरामेषां वाक्यानां प्रामाण्यविरहत्वसंभावना स्यात्तस्माद्ब्राह्मणग्रन्थानामपौरुषेयत्वं स्वतस्सिद्धम् । अत एव वेदशब्देन ब्राह्मणभागसंहिताभागसमूह उच्यते न तु संहितामात्रं शब्दार्थयोर्मुख्यात्मिकया शक्त्या तदर्थत्वस्यैव संभवादिति भाष्यं संलगति अन्यथा तदसङ्गतिस्स्पष्टैवेति निरीक्षणीयं भाष्यम् ।

( २ ) अथ द्वितीया ब्राह्मणे इत्यादिपाणिनिसूत्राणामुत्तरन्तु पूर्वपत्रेऽस्माभिः प्रेषितन्तत्राशयोत्थापनपुरस्सरमुदाहरणस्थापनपुरस्सरं च सूत्रार्थं प्रदर्श्य भवत्पत्रं खण्डितमिति पुनरपि तदुत्थापने न किमपि दृढं फलान्तरं पश्याम इति पाणिनिसूत्राणां विषयमपहाय विषयान्तरं निरूप्यते सम्यगवधेहि–सर्वसम्मतब्राह्मणग्रन्थेषु अग्निर्ज्योतिरिति मन्त्रस्य व्याख्यानदर्शनं किन्तेषां प्रतारकनिर्मितत्वप्रयोजकमुतापौरुषेयत्वभङ्गप्रयोजकमाहोस्वित्सादित्वप्रयोजकं नाद्यः अग्निर्ज्योतिरित्यादिमन्त्रव्याख्यानदर्शनस्य ग्रन्थे प्रतारकनिर्मितत्वव्यभिचरितत्वात् न हि लोकेऽखिलं व्याख्यानं प्रतारकैर्विरचितमित्युन्मत्तवद्गतामुत्प्रेक्षणम् न द्वितीयः व्याकरणमहाभाष्ये शाङ्करभाष्ये चाष्टाध्यायीस्थसूत्राणां व्याख्यानमसकृदभिहितमिति मूलग्रन्थानान्नापादयत्यप्रयोजकत्वं किन्तु व्याख्येयव्याख्यानसमुदितम्महाभाष्यम्भवति, तथाग्निर्ज्योतिरित्यादिव्याख्यानोक्तिरपि वेदानां सर्वविद्यामूलकतया लौकिकानां भवादृशानां पुंसां सौकार्य्याय तत्र भगवज्जगदीश्वरेण ब्रह्मविद्यानामुपदेशात् यथोत्पत्त्यनन्तरं नोत्पत्तिप्रतिपादको वेदो विरचितः किन्तूत्पत्तिरेवानादिप्रवाहसिद्धानां वेदानां समनन्तरमिति न ब्राह्मणेषु व्याख्यानदर्शनम्भवत्यपौरुषेयत्वप्रयोजकम् नापि तृतीयः आदिमतामृषीणां व्याख्यानदर्शनस्य ब्राह्मणग्रन्थेषु सादिमत्वशङ्काप्रयोजकत्वस्यास

कृदभिहितत्वात्तथा च सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चिन्मिषत् आपो ह वा इदमग्रे सलिलमेवास, इदं वा अग्रे नैव किञ्चिदासीदित्यादीनि छान्दोग्यैतरेयारण्यकोपनिषच्छतपथवचनानि ब्राह्मणग्रन्थान्तर्गतान्येवेत्यपौरुषेयत्वे वेदत्वे च काचिच्छतिर्नास्तीत्यलं बहुविस्तरेण ॥

( ३ ) अथ यदुक्तं मन्त्रब्राह्मणयोर्वेदनामधेयमित्यस्योपरि यदुक्तमस्माभिस्तदेव सम्यक् भाष्यसम्मतञ्चेति तद्तिस्थवीयम् तथा हि मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनसूत्रेण बहुगणवतुडतिसङ्ख्येति सूत्रभाष्येण स्थानिवत्सूत्रभाष्येण च विनापि वतिनाऽतिदेशो गम्यत इति ब्राह्मणग्रन्थेषु वेदत्वातिदेशो न तु साक्षात्तस्य वेदत्वमिति भवतामाशयमाविष्कुर्वन्नोच्यते प्रथमन्तावदिदमवधारणीयम् मन्त्रश्च ब्राह्मणञ्चेतीतरेतरयोगसमाहारद्वन्द्वे तदेकदेशभूते ब्राह्मणे वेदत्वमतिदिश्यते न तु मन्त्रभागे इति महाननर्थः न हि एकत्रार्थेऽवतिष्ठमानयोः पदयोरन्तरेकस्यान्यत्रार्थेऽन्वयः द्वितीयस्य चान्यत्रार्थेऽन्वय इति लोके शास्त्रे च दृष्टस्तथा चैकक्रियायामन्वयादेकार्थप्रतिपादकौ मन्त्रब्राह्मणशब्दौ । यथा घटपटं पश्यत्यत्र घटकर्म्मकं पटकर्मकं दर्शनमिति भवति बोधः न तु घटकर्मकं दर्शनं पटकर्मकं स्पर्शनमिति बोधस्तथा मन्त्रब्राह्मणयोरित्यस्य वेदनामधेयमित्यत्रान्वयान्न हि संभवत्येकत्रांशे साक्षाद्वेदत्वं एकत्रांशे चारोपितवेदत्वमिति । अत एव सह विवक्षायामेव समास इति वैयाकरणानामुद्घोषस्सङ्गच्छते । तत्वञ्च परस्परान्वितानां पदानामेकत्रार्थेऽन्वय इति स्फुटं प्रतीयते भवतां व्याकरणेऽतिपरिश्रमः । किञ्च अथ वानेदं संज्ञाकरणं तद्वदतिदेशोयमित्यारभ्य संख्यावदिति गम्यत इत्यन्तबहुगणवतुडतिसङ्ख्येति सूत्रस्थभाष्यस्य वत्करणं किमर्थमितिस्थानिवत्सूत्रस्थभाष्यस्य चाशयो भवद्भिः प्रदर्शितस्तेनापि जानीमो गुरुमुखान्नाधीतं महाभाष्यं किन्तु निजमनसैव भाष्यस्य विपर्य्यस्तोर्थः कल्प्यते इति महान्साहसिका भवन्तः । तथा च वद्घटितत्वमतिदेशत्वमित्यतिदेशलक्षणं प्रकृतसूत्रे न संघटत इति ब्राह्मणग्रन्थेषु नातिदेष्टव्यं वेदत्वं किन्तु साक्षात्तस्य वेदत्वम् । किञ्च मन्त्रग्रहणं विध्यर्थमेव न नियमार्थमित्युक्तमस्माभिस्तदेव सम्यक् भाष्यसम्मतञ्चेति विद्यन्ते धर्मार्थकाममोक्षा येनेति व्युत्पत्या यथा मन्त्रभागो धर्म्मार्थकाममोक्षाणां साधनभूतस्तथा ब्राह्मणभागोपि धर्म्मार्थकाममोक्षाणां साधनभूत इत्यपौरुषेयत्वोभयत्रापि तुल्यमेव तस्मान्मन्त्रग्रहणं विध्यर्थमेवेति तत्वम् ।

(४) किञ्चेत्यारभ्य प्रतिपादितमित्यन्तं यल्लिखितं तदपि दत्तोत्तरमेव तथा हि ब्राह्मणानां मन्त्रवत्सम्माननीयत्वेन श्रुतित्वेन व्यवह्रियमाणत्वेन कर्मकाण्डमूलभूतत्वेन चापौरुषेयत्वे वेदत्वे च नास्ति कश्चन विरोधः । अत एव प्रज्ञानं ब्रह्मेत्यादि वचनं ब्राह्मणग्रन्थस्थं सङ्गच्छते अन्यथा तदसङ्गतिस्स्पष्टैव । किञ्च भवतां गुरुभिर्दयानन्दस्वामिभिरपि निजनिर्मितसत्यार्थप्रकाशे पृ० ११ पं० उपनिषदामप्यङ्गीकृतं वेदत्वं किं पुनर्ब्राह्मणग्रन्थानां वेदत्वे हानिकारकं तथा हि ओमित्येतदक्षरमिदमुपासीत । ओमित्येतदक्षरमिदं सर्वमित्यादि छान्दोग्यमाण्डूक्यग्रन्थानां वचनम् एवं श्रुतिरपि प्रधानकार्यत्वस्य साङ्ख्यसूत्रं तदर्थश्चोपनिषदपि प्रधानस्यैव जगत उपादानकारणङ्कथयतीति श्रुतिशब्देनोपनिषत्पर्य्यन्तस्यावबोधनङ्कृतमिति ब्राह्मणेषु वेदत्वं स्वतस्सिद्धम्म् अतएवैताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् विविधाश्चोपनिषदीरात्मसंसिद्धये श्रुतिरिति मनुवचनं सङ्गच्छते तेन सकलजगतामनादिरादिभूतऋग्यजुस्सामादिमयी भगवद्विस्तुमयस्य ब्रह्मणो मूर्त्तिरूपं हिरण्यगर्भो ब्रह्माण्डतो भगवान्ब्रह्मा प्राग्बभूव यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिं प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इत्याद्युपनिषदां वचनं वेदत्वतात्पर्य्यार्थग्राहकं संलगतीति ब्राह्मणग्रन्थानां वेदत्वे न कश्चिदस्ति विरोधः।

(५) अथ संहिताभागे न कुत्रापि व्याख्यानमित्यारभ्य निग्रहस्थानमित्यन्त यद्यल्लिखितन्तत्सर्वं खण्डनीयम् । तथा हि कस्यापि प्रतीकधारणपुरस्सरं पदपदार्थविग्रहवाक्ययोजनादिभिर्भवति व्याख्यानमिति नास्ति नियमः अन्यथा नित्याश्शब्दा नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैरनपायोपजनविकारिभिरित्यादिभाष्यस्थ व्याख्यानमसमंजसं स्यादिति प्रजापते नेत्यादिमन्त्रघटितविश्वारूपाणीत्यादिपदानां विश्वाजातानीत्यादि व्याख्यानमेव किं च यद्यर्थान्तरप्रयोजनायोदाहृतानीत्युच्यते तर्हि ततएव व्याख्यानं स्फुटं सेत्स्यति किञ्च यस्सपक्षे विपक्षे चेत्यादिनाव्याख्यानत्वादिति हेतुर्नानैकान्तिक इति भवतां कथनन्तु महद्बाधजनकं तथा हि पक्षतावच्छेदकावच्छेदेनानुमितित्वावच्छिन्नं प्रति पक्षतावच्छेदकधर्म्मप्रकारकनिश्चयस्य कारणत्वं पक्षता च प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारतानु मितत्वावच्छिन्नं प्रति प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकृतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्यावच्छेदकावच्छिन्नप्रकारतानिरूपिता प्रकृतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारता-

निरूपिता या प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता तादृशविशेष्यताकसंशय इति तथा चैतादृशी पक्षता भवतामनुमाने न संघटते इति पक्षताऽसद्भावे विपक्षसपक्षनिरूपणमप्रासङ्गिकं प्रकारणान्तरं च किं च यत्रैकस्मिन्धर्म्मिणि नानाविरुद्धधर्म्मावगाहि ज्ञानं वरिवार्त्ति तत्रैवानुमतिर्भवति प्रकृते च भवतामनुमाने नास्त्येतादृशं ज्ञानमिति व्याख्यानत्वादिति हेतुरेवासिद्धः ॥

( ६ ) अथ हिरण्यगर्भेत्यारभ्य निग्रहस्थानमित्यन्तं यल्लिपितं तत्तु व्यामोहेन तथाहि मन्त्रे पशुपक्षिणां भूयो २ नमोत्कीर्त्तनदर्शनेन हिरण्यगर्भस्समवर्त्तताग्र इत्यादीनामुपादानेन च स्पष्टं संहिताभागे इतिहासः प्रतीयत इति ब्राह्मणेषु साक्षाद्वेदत्वमपौरुषेयत्वमित्यनया युक्त्या युष्मत्पूर्वपत्रं खण्डितं तस्यैव पुनरपि भवद्भिरुत्थापनं क्रियते इति मिथ्यायुक्तम् । किञ्च ब्राह्मणानि न वेदाः पौरुषेयत्वादिति भवतामनुमानं गगनं वन्हिर्धूमवत्वादितिवत् । ब्राह्मणानि वेदा अपौरुषेयवाक्यत्वादित्यस्माकमनुमानन्तु पर्वतो वन्हिमान् धूमवत्वादितिवत् किं च भवतां पौरुषेयत्वादिति हेतुरेवासिद्धः सिद्धश्चेति ब्रूषे तर्हि साध्यतामन्यथा स्वयमसिद्धः कथं परान् साधयतीति न्यायेन पौरुषेयत्वादिति हेतुस्स्वयमसिद्धः सन् कथं परं ब्राह्मणेषु वेदत्वाभावं सिसाधयिष्यतीति ब्राह्मणग्रन्थवैरिणः परास्ताः ॥

( ७ ) यदुक्तं भवद्भिर्ब्राह्मणानामपि मन्त्रभागवत्प्रमाणं परन्तु सिंहो माणवक इति वद्ब्राह्मणानि वेदा न भवन्तीति तत्तुच्छं तथा हि सिंहो माणवकः मंचाः क्रोशन्तीत्यादौ त्वन्वयानुपपत्या सिंहसदृशे मंचस्थे च लक्षणा भवति प्रकृते अन्वयानुपपत्यसंभवान्नवेदसदृशे लक्षणेत्यनया रीत्या मंत्रभागेपि वेदसदृशत्वं लक्षणया स्यात् तथा अभिन्नेष्वपि तुल्यातिदेशो गम्यते यथा

गगनं गगनाकारं सागरः सागरोपमम् । रामरावणयोर्युद्धं रामरावणयोरिव ॥

इत्यादौ तस्माद्भवदुक्तमखिलं पूतिकूष्माण्डायितम् ॥

( ८ ) यदुक्तमस्माभिरित्यारभ्य तत्तु न सम्यगित्यन्तं यल्लिखितमस्माकं प्रतारणायोद्यतैर्भवद्भिस्तत्त्वत्याश्चर्य्यम् । तथा हि ब्राह्मणग्रन्थेषु द्रष्टृत्वमेव संघटते न प्रवक्तृत्वं ब्राह्मणग्रन्थानामपौरुषेयत्वाभिधानेन तदभावः । चतुर्वेदविद्भिरित्यादि शतपथब्राह्मणवचनस्यार्थस्तु यथा विश्वसृजा ब्रह्मणा लोकोपकारार्थं चतुर्भिर्मुखैरनादिप्रवाहभूताश्चत्वारो वेदाः परमर्षिभ्यः प्रकाशिता न तु स्वयं निर्मितास्तथा चतुरो वेदान् विदन्ति जानन्तीति चतुर्वेदविदस्तैर्महर्षिभिर्ब्राह्मणैर्ब्राह्मणग्रन्था निजशिष्यप्रशिष्योपकाराय लोके भवादृशानां पुंसामन्तस्करणब्र

स्यज्ञानध्वंसाय कर्म्मकाण्डकलापप्रस्थापनाय च प्रकाशिता न तु निर्मिता इति एवञ्च ब्राह्मणग्रन्थेष्वपौरुषेयत्वाभावसाधने प्रवृत्ता भवन्तः परास्ताः किञ्च अथ शब्दानुशासनमित्यस्य अथेत्ययमिति प्रतीकधारणपुरस्सरं स्वेनैव पतञ्जलिना व्याख्या कृता तद्वद्यदिमंत्रभागस्य व्याख्यानं ब्राह्मणं भवेत्तर्हि का वो हानिरिति पूर्वपत्रे निवेदितं तदेव सम्यक् तत्र भवतामाशङ्का अथ शब्दानुशासनमित्यस्य अथेत्ययमिति प्रतीकस्य चैक एव पतञ्जलिर्वक्ता नो तथा मन्त्रब्राह्मणयोरित्यस्येति सात्वबोधजनिका तथा हि अष्टाध्ययीस्थसूत्राणां भाष्ये भगवता पतञ्जलिना व्याख्यानं कृतं तत्किमष्टाध्यायीस्थसूत्रतोऽतिरिक्तं भाष्यं प्रमाणतयोपन्यस्तं न भवेत् किन्तु भवेदेव तथैव संहितास्थमन्त्राणां समानकर्त्तृकाणं समानकर्त्तृकेषु ब्राह्मणग्रन्थेषु यदि व्याख्या दृश्यते तथा किं ब्राह्मणानामपौरुषेयत्वं न स्यादिति भवत्पत्रसमीक्षावसरे ज्ञातमस्माभिर्भवद्भिरस्मदुक्तेस्सम्यगुत्तरमदत्वा यत्किञ्चिल्लिखितं तत्सर्वं दयानन्दनिर्मितसत्यार्थप्रकाशग्रन्थानुशरणं कृत्वैव न तु किमपि निजबुद्धिवैभवेनेति सर्वं पिष्टपेषणं कृतम् ॥ ॥ श्लो० ॥

तन्मिथ्यार्थप्रकाशस्य खण्डनं बहुभिः कृतम् ॥ तस्मात्तदनुसारेण श्रीमतां लेखनं मुधा॥१॥किञ्च अग्नेर्वा ऋग्वेदो जायते वायोर्यजुर्वेदः सूर्य्यात्सामवेद इति शतपथवचनं प्रमाणत्वेनोपन्यस्य सर्वेषां मन्त्रब्राह्मणसमूहानां ऋषिप्रोक्तत्वं कथं न प्रतिपाद्यते किं पुनर्ब्राह्मणेष्वेवापराधो भवतां अत एव अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनं दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणामिति महर्षिमनुनोक्तं वचनं सङ्गच्छते इत्यलं पल्लवितेन ॥ १ ॥

(९) अथ यदुक्तं नास्माभिर्ब्राह्मणग्रन्थानां खण्डनं क्रियते किन्तु तेषु वेदत्वाभाव एव संसाध्यते इति तदप्यसङ्गतम् तथा हि वेदत्वाभावसाधनेनैव तेषां खण्डनमप्रामाण्यञ्च जातं पुनर्भवताङ्कथनन्तु विषपूर्णघटवत् अस्माभिस्तु तेषां पुरुषनिर्मितत्वाभावसिसाधयिषुभिश्शिरसा प्रामाण्यमभिमन्यते यतो मीमांसाशास्त्रे अपौरुषेयं वाक्यं वेद इति वेदलक्षणं प्रतिपाद्य स च पञ्च विधः विधिमन्त्रनामधेयनिषेधार्थवादभेदादित्युक्तं तेनापि स्फुटं ब्राह्मणानामपौरुषेयत्वं वेदत्वञ्च प्रतीयत इति मद्वत्तोराणामाशयमपहाय प्रमाणान्तरेण यद्यपौरुषेयत्वं संसाध्यते चेत्सम्यक् अन्यथा पिष्टपेषणमेव यतश्शेषे ब्राह्मणशब्दः द्वितीया ब्राह्मणे मन्त्रब्राह्मणयोर्वेदनामधेयमित्यादीनां सूत्राणामस्माभिः प्रमाणत्वेनोपन्यस्तानामेव पुनः२उपादानमर्थान्तरकरणे प्रवृत्तैर्भिक्रियते इति श्रीमन्महाराजाभिरा-

जानां मते न शोभनमिति चमत्कृतिजनकतावच्छेदकं व्याख्यानं अस्मत्प्रमाणा-त्प्रमाणान्तरञ्च देयं यद्येकवारं प्रमाणभूतं जातं पुनस्तस्यैवोपादानमसङ्गतम् ॥

( १० ) अथापौरुषेयं वाक्यं वेद इत्यारभ्य निग्रहस्थानं भवतामित्यन्तं यत्किञ्चिल्लिखितं तत्सर्वं मिथ्याप्रलपनमेव तथा हि द्वितीयपत्रे ऋचां दशसहस्राणि इत्यादिचरणव्यूहग्रन्थवचनप्रामाण्येनान्या संख्या लिखिता तृतीये तुरीये च दले शतपथवचनेनान्या संख्या प्रतिपादिता पञ्चमे पीतोन्यैव साधनीयेति ज्ञायते भवतां कुत्रापि नास्ति दृढनिश्चयः अस्माभिस्तु पूर्वमेव चतुर्णामपि निगमानां लक्षात्मकत्वं प्रदर्श्य निवेदितं प्रत्येकं च ऋचां दसशहस्राणि ऋचां पञ्च शतानि च ऋचामशीति पादश्च तत्पारायणमुच्यते इति ऋग्वेदस्य पारायणं एवं द्वे सहस्रे शतन्यूने मंत्रा वाजसनेयके तावन्मानेन संख्यातं वालखिल्यं सशुक्रियमिति यजुर्वेदस्य एवमष्टौ सामसहस्राणि सामानि च चतुर्दश ऊह्यानि सरहस्यानीत्येतत्सामगणस्स्मृत इति सामवेदस्य एवं द्वादशानि सहस्राणि मन्त्राणां त्रिशतानि च गोपथं ब्राह्मणं वेदेथर्वणे शतपाठकमित्यथर्वणवेदस्येति मन्त्रभागब्राह्मणभागसमूहानामेतावती संख्या न पुनः केवलं संहिताभागमात्रस्येत्यवधारणीयम् ॥ किं च तद्वचनादाम्नायस्य प्रामाण्यम् मन्त्रायुर्वेदवच्च तत्प्रामाण्यात्प्रामाण्यादिसूत्रबलेनाम्नायपदेनोपनिषत्पर्य्यन्तस्याऽवोधनं श्रीकाणादाचार्य्यैः कृतमिति ब्राह्मणग्रन्थेष्वपौरुषेयत्वं वेदत्वं च स्पष्टं प्रतीयतइति शम् ॥

अथ भवद्भिर्दृढतरं प्रमाणमदत्वैव पुनः २ पिष्टपेषणं क्रियते चेन्महती विडम्बनेत्यतः परमेतत्पत्रोत्तरं सम्यग्विद्वच्छैल्यनुसारेण लेखनीयं अन्यथा कालक्षेपोऽतिपरिश्रमश्चेति ज्ञेयम्म् ॥ ० ॥

भवतां पूर्वपत्रागमनसमये मासत्रयार्थं निजदेशं प्रति गमनङ्कृतमस्माभिस्तथा तत्समये श्री १०८ मन्महाराजाधिराजानामपि निजराष्ट्रगतं कञ्चिद्ग्रामं प्रति गमनं जातमिति पत्रोत्तरदाने शैथिल्यं जातमिति ज्ञेयम् ॥ परन्तु भवतां शैथिल्ये किङ्कारणम् ॥ तस्मात् पिष्टपेषणतो विद्वन् तथोक्तार्थप्रकाशनात् । व्यतीतसमयाच्चाथ याता यूयं परास्तताम् ॥ १ ॥ अज्ञानतिमिरान्धेन दयानन्देन निर्मितः सत्सत्यार्थप्रकाशश्च भवद्भिस्त्यज्यताङ्किल ॥ २ ॥

शुभमस्तु नरेन्द्राय सहामात्याय धीमते ॥ धर्मार्थकाममोक्षाणां साधनोपायकारिणे ॥ ३ ॥ ॥ शुभम् ॥ ॥ चैत्र-शुक्ला० २ गुरौ० सं० १९५६ ॥

ह० व्याकरणाचार्य्य पं० चन्द्रशेखरशर्म्मणाम् ॥

राजधानी-करोली राजपूताना-इति शम् ॥

## ॥ पञ्चमं शाहपुरापत्त्रम् ॥

॥ ओ३म् ॥

श्रीयुतपण्डितवरचन्द्रशेखरशर्म्मसु प्रणतिपुरस्सरं निवेदनम् ॥

समागतं भवतां पञ्चमं पत्त्रं परमस्माभिः प्रदर्शितानि भवच्छिग्रहस्थानानि-तान्यनुकृत्य दत्तोत्तराराणामेव पुनरुपादानादन्येभ्योपि हेतुभ्यः समाप्तोयं शास्त्रार्थः । तं च समालोचिष्यन्ते सारासारविवेकिनो विद्वांसः । अत एवैतस्य मुद्रणप्रवन्धोप्यस्माभिः कृतः । मुद्रिते च समर्पयिष्यामः कतिपयानि पुस्तकानि ।

विशेषस्तु सम्प्रति भारतवर्षे प्रतिदिनं सुकृतोदासीनता संस्कृतविद्यायाश्च ह्रास एव । ईदृक्कलौ श्रीमत्करोलीशमहाराजानां धर्म्मनिष्ठापुरःसरसंस्कृतविद्यानुरागः प्रशंसनीय एव, यतो विद्वन्महाराजानां प्रतापादेव धर्म्मस्थितिरभूत् । एवं च श्रीमच्छदृशमहाराजेषु शास्त्रचर्चाप्रवाहे सति संस्कृतविद्योन्नतिर्भवेदेव। अतः श्रीमतामिममनुरागं ज्ञात्वा नितान्तधन्यवादपुरःसरमस्मद्दत्तमिदमाशीर्वचः सफलयतु जगदीश्वरः ॥

धर्म्मे रतिर्यास्ति तथास्तु धीर स्वस्त्यस्तु ते यादववंशवीर ॥
पुत्रं लभस्वात्मसमं प्रजेश जीयाः समानां शतमत्र भूप ॥ १ ॥

किञ्च मृगयाजनिताघातवेदनानिवृत्तितः श्रीमन्महाराजानां निरामयश्रवणेन चातीव हर्षोऽस्माकमेतत्सर्वं निवेदयन्तु श्रीमत्करोलीशमहाराजानां सन्निधौ ।

भवन्तो विद्वांसश्चास्मासु दयां कुर्वन्तः सत्यवकाशे कुशलपत्त्रं ददतश्च प्रसीदन्त्विति शम् ॥ वै० शु० १२ चं० सं० १९५६

**हस्ताक्षराणि श्रीमत्--शाहपुराधिनाथराजाधिराजाज्ञानुवर्त्तिनो राजगुरु--यमुनादत्तषट्शास्त्रिणः ।**
**राजधानी--शाहपुरा--राजपूताना ॥**

---

## ॥ षष्ठं करोलीपत्त्रम् ॥

॥ ॐम् ॥

स्वस्तिश्रीयुतसर्वोत्तमोपमार्हविविधविद्याविशारदयमुनादत्तषट्शास्त्रिषु प्रणतिपुरस्सरं निवेदनम् ॥

संप्राप्य पञ्चमं पत्रं यादवाधीशसन्निधौ ॥
समर्पितं दलस्थं ते वृत्तान्तं ज्ञातवान्नृपः ॥ १ ॥

अथ मदीयं पञ्चमं पत्रमुररीकृतं शास्त्रार्थसमाप्तिश्चेति काकतालीयन्यायेनेति मद्रणप्रचन्धो भवद्भिस्सारासारविवेकिनां विदुषां समालोचनार्थं कृतस्तं च सफलयतु श्रीमदनमोहनः ॥

विशेषस्तु संप्रति कवलीकृतकलिकरालनक्रसंस्कृतविद्याप्रवाहमतङ्गेऽत्र भारतवर्षे श्रीमन्महाराजाधिराजशाहपुराधिनाथानां श्रौतस्मार्त्तकर्म्मानुष्ठानकर्त्तॄणां शास्त्रे गरीयसी मतिरसकृत्प्रशंसनीया ॥ तथा चैतादृशी शास्त्रचर्चा लोकोन्नतिकारणी भूता चेत्तर्हि लुप्तप्रायसंस्कृतविद्योद्धरणं भवेदेवेति श्रीमतामेतादृशीं मतिं विज्ञाय भूयो भूया नितान्तधन्यवादपुरस्सरमस्मद्दत्तनिम्नलिखिताशिर्वचनमवरतं भवतु सफलम् ॥ तथा हि ॥

धर्म्माणां प्रतिपालको नुदिवसं हन्तुं परानुद्यतः
नाना शास्त्रविचारचारुचतुरो न्याये महीपाग्रणीः ॥
दाने चाभिरुचिर्निरामययुतः कल्याणकल्पद्रुमः
स त्वङ्कोटिमितार्बुदाब्दमपरो राज्यं कुरुष्वांजसा ॥ १ ॥

किञ्च श्रीमन्महाराजानामपरोक्षसाधनभूतवेदजन्याभिरुचिं ज्ञात्वाऽतीवानन्दातिशयोस्माकं जातः। एतत्सर्वं सानुनयं शाहपुराधिनाथानां सन्निधौ निवेदयन्तु सुधियः ॥

विद्वांसश्च भवन्तः परमानुकम्पाङ्कुर्वन्तस्सदा निरामयपत्रं ददश्च कुशलिनस्सन्तु-महाराजेष्वस्माकं विनयपुरस्सरं सर्वं वृत्तं निवेदयित्वा यत्किञ्चिल्लेखनदोषेणानुचितं यातं तत्सर्वं क्षमापयध्वं किमधिकलेखनत इति शम् ॥

ज्ये० कृ०

ह० श्रीमन्महाराजाधिराजकरौलीनरेशाज्ञानुवर्तिनो
व्याकरणाचार्य्य पं० चन्द्रशेखरशर्म्मणः

## ॥ समाप्तश्चैष वेदनिर्णयः ॥

गुरु विरजानन्द स्मारक
3295
परिग्रहण क्रमांक
... महिला महाविद्यालय, ...